श्रीमद्वाग्भटविरचिते
अष्टाङ्गहृदये निदानस्थानम्
प्रथमोऽध्यायः

अथातः सर्वरोगनिदानं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
रोगः पाप्मा ज्वरो व्याधिर्विकारो दुःखमामयः
यक्ष्मातङ्कगदाबाधाः शब्दाः पर्यायवाचिनः १
निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा
सम्प्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम् २
निमित्तहेत्वायतनप्रत्य योत्थानकारणैः
निदानमाहुः पर्यायैः प्राग्रूपं येन लक्ष्यते ३
उत्पित्सुरामयो दोषविशेषेणानधिष्ठितः
लिङ्गमव्यक्तमल्पत्वाद्व्याधीनां तद्यथायथम् ४
तदेव व्यक्ततां यातं रूपमित्यभिधीयते
संस्थानं व्यञ्जनं लिङ्गं लक्षणं चिह्नमाकृतिः ५
हेतुव्याधिविपर्यस्तविपर्यस्तार्थ कारिणाम्
औषधान्नविहाराणामुपयोगं सुखावहम् ६
विद्यादुपशयं व्याधेः स हि सात्म्यमिति स्मृतः
विपरीतोऽनुपशयो व्याध्यसात्म्याभिसंज्ञितः ७
यथादुष्टेन दोषेण यथा चानुविसर्पता
निर्वृत्तिरामयस्यासौ सम्प्राप्तिर्जातिरागतिः ८
सङ्ख्याविकल्पप्राधान्य बलकालविशेषतः
सा भिद्यते यथाऽत्रैव वक्ष्यन्तेऽष्टौ ज्वरा इति ९
दोषाणां समवेतानां विकल्पोंऽशाशकल्पना
स्वातन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यमादिशेत् १०
हेत्वादिकात्स्न्यावयवैर्बलाबल विशेषणम्
नक्तंदिनर्तुभुक्तांशैर्व्याधिकालो यथामलम् ११
इति प्रोक्तो निदानार्थः तं व्यासेनोपदेक्ष्यति
सर्वेषामेव रोगाणां निदानं कुपिता मलाः १२
तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम्

अहितं त्रिविधो योगस्त्रयाणां प्रागुदाहृतः १३
तिक्तोषणकषायाल्प रूक्षप्रमितभोजनैः
धारणोदीरण निशाजागरात्युच्चभाषणैः १४
क्रियातियोगभी शोकचिन्ताव्यायाममैथुनैः
ग्रीष्माहोरात्रिभुक्तान्ते प्रकुप्यति समीरणः १५
पित्तं कट्वम्लतीक्ष्णोष्णपटुक्रोधविदाहिभिः
शरन्मध्याह्नरात्र्यर्धविदाहसमयेषु च १६
स्वाद्वम्ललवणस्निग्धगुर्वभिष्यन्दि शीतलैः
आस्यास्वप्नसुखाजीर्ण दिवास्वप्नातिबृंहणैः १७
प्रच्छर्दनाद्ययोगेन भुक्त मात्रवसन्तयोः
पूर्वाह्णे पूर्वरात्रे च श्लेष्मा द्वन्द्वं तु सङ्करात् १८
मिश्रीभावात्समस्तानां सन्निपातस्तथा पुनः
सङ्कीर्णाजीर्णविषम विरुद्धाध्यशनादिभिः १९
व्यापन्नमद्यपानीय शुष्कशाकाममूलकैः
पिण्याकमृद्यवसुरापूतिशुष्क कृशामिषैः २०
दोषत्रयकरैस्तैस्तैस्तथाऽन्न परिवर्तनात्
ऋतोर्दुष्टात्पुरोवाताद् ग्रहावेशाद्विषाद्गरात् २१
दुष्टान्नात् पर्वताश्लेषाद्ग्रहैर्जन्मर्क्षपीडनात्
मिथ्यायोगाच्च विविधात्पापानां च निषेवणात् २२
स्त्रीणां प्रसववैषम्यात्तथा मिथ्योपचारतः
प्रतिरोगमिति क्रुद्धा रोगाधिष्ठानगामिनीः २३
रसायनीः प्रपद्याशु दोषा देहे विकुर्वते २३-२
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां
तृतीये निदानस्थानेसर्वरोगनिदानं नाम प्रथमोऽध्यायः १

द्वितीयोऽध्यायः

अथातो ज्वरनिदानं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
ज्वरो रोगपतिः पाप्मा मृत्युरोजोशनोऽन्तकः
क्रोधो दक्षाध्वरध्वंसी रुद्रोर्ध्वनयनोद्भवः १

जन्मान्तयोर्मोहमयः सन्तापात्माऽपचारजः
विविधैर्नामभिः क्रूरो नानायोनिषु वर्तते २
स जायतेऽष्टधा दोषैः पृथङ्मिश्रैः समागतैः
आगन्तुश्च मलास्तत्र स्वैः स्वैर्दुष्टाः प्रदूषणैः ३
आमाशयं प्रविश्याममनुगम्य पिधाय च
स्रोतांसि पक्तिस्थानाच्च निरस्य ज्वलनं बहिः ४
सह तेनाभिसर्पन्तस्तपन्तः सकलं वपुः
कुर्वन्तो गात्रमत्युष्णं ज्वरं निर्वर्तयन्ति ते ५
स्रोतोविबन्धात्प्रायेण ततः स्वेदो न जायते
तस्य प्राग्रूपमालस्यमरतिर्गात्रगौरवम् ६
आस्यवैरस्यमरुचिजृम्भा सास्राकुलाक्षिता
अङ्गमर्दोऽविपाकोऽल्पप्राणता बहुनिद्रता ७
रोमहर्षो विनमनं पिण्डकोद्वेष्टनं क्लमः
हितोपदेशेष्वक्षान्तिः प्रीतिरम्लपटूषणे ८
द्वेषः स्वादुषु भक्ष्येषु तथा बालेषु तृड् भृशम्
शब्दाग्निशीतवाताम्बुच्छायोष्णेष्वनिमित्ततः ९
इच्छा द्वेषश्च तदनु ज्वरस्य व्यक्तता भवेत्
आगमापगमक्षोभमृदुतावेदनोष्मणाम् १०
वैषम्यं तत्रतत्राङ्गे तास्ताः स्युर्वेदनाश्चलाः
पादयोः सुप्तता स्तम्भः पिण्डकोद्वेष्टनं श्रमः ११
विश्लेष इव सन्धीनां साद ऊर्वोः कटीग्रहः
पृष्ठं क्षोदमिवाप्नोति निष्पीड्यत इवोदरम् १२
छिद्यन्त इव चास्थीनि पार्श्वगानि विशेषतः
हृदयस्य ग्रहस्तोदः प्राजनेनेव वक्षसः १३
स्कन्धयोर्मथनं बाह्वोर्भेदः पीडनमंसयोः
अशक्तिर्भक्षणे हन्वोर्जृम्भणं कर्णयोः स्वनः १४
निस्तोदः शङ्खयोमूर्ध्नि वेदना विरसास्यता
कषायास्यत्वमथवा मलानामप्रवर्तनम् १५
रूक्षारुणत्वगास्याक्षिनख मूत्रपुरीषता
प्रसेकारोचकाश्रद्धा विपाकास्वेदजागराः १६

कण्ठौष्ठशोषस्तृट् शुष्कौ छर्दिकासौ विषादिता
हर्षो रोमाङ्गदन्तेषु वेपथुः क्षवथोर्ग्रहः १७
भ्रमः प्रलापो घर्मेच्छा विनामश्चानिलज्वरे
युगपद्व्याप्तिरङ्गानां प्रलापः कटुवक्त्रता १८
नासास्यपाकः शीतेच्छा भ्रमो मूर्च्छा मदोऽरतिः
विट्स्रंसः पित्तवमनं रक्तष्ठीवनमम्लकः १९
रक्तकोठोद्गमः पीतहरितत्वं त्वगादिषु
स्वेदो निःश्वासवैगन्ध्यमतितृष्णा च पित्तजे २०
विशेषादरुचिर्जाड्यं स्रोतोरोधोऽल्पवेगता
प्रसेको मुखमाधुर्यं हृल्लेपश्वासपीनसाः २१
हृल्लासश्छर्दनं कासः स्तम्भः श्वैत्यं त्वगादिषु
अङ्गेषु शीतपिटिकास्तन्द्रोदर्दः कफोद्भवे २२
काले यथास्वं सर्वेषां प्रवृत्तिर्वृद्धिरेव वा
निदानोक्तानुपशयो विपरीतोपशायिता
यथास्वं लिङ्गसंसर्गे ज्वरः संसर्गजोऽपि च २३
शिरोर्तिमूर्च्छा वमिदाहमोह कण्ठास्यशोषारतिपर्वभेदाः
उन्निद्रतातृड्भ्रमरोमहर्षा जृम्भातिवाक्त्वं च चलात्सपित्तात २४
तापहान्यरुचिपर्वशिरोरुक् पीनसश्वसनकासविबन्धाः
शीतजाड्यतिमिरभ्रमतन्द्राःश्लेष्मवातजनितज्वरलिङ्गम् २५
शीतस्तम्भस्वेददाहाव्यवस्थातृष्णाकासश्लेष्मपित्तप्रवृत्तिः
मोहस्तन्द्रालिप्ततिक्तास्यता च ज्ञेयं रूपं श्लेष्मपित्तज्वरस्य २६
सर्वजो लक्षणैः सर्वैर्दाहोऽत्र च मुहुर्मुहुः
तद्वच्छीतं महानिद्रा दिवा जागरणं निशि २७
सदा वा नैव वा निद्रा महास्वेदोऽति नैव वा
गीतनर्तनहास्यादिविकृतेहा प्रवर्तनम् २८
साश्रुणी कलुषे रक्ते भुग्ने लुलितपक्ष्मणी
अक्षिणी पिण्डिकापार्श्वमूर्द्धपर्वास्थिरुग्भ्रमः २९
सस्वनौ सरुजौ कर्णौ कण्ठः शूकैरिवाचितः
परिदग्धा खरा जिह्वा गुरुः स्रस्ताङ्गसन्धिता ३०
रक्तपित्तकफष्ठीवो लोलनं शिरसोऽतिरुक्

कोठानां श्यावरक्तानां मण्डलानां च दर्शनम् ३१
हृद्व्यथा मलसंसङ्गः प्रवृत्तिर्वाऽल्पशोऽति वा
स्निग्धास्यता बलभ्रंशः स्वरसादः प्रलापिता ३२
दोषपाकश्चिरात्तन्द्रा प्रततं कण्ठकूजनम्
सन्निपातमभिन्यासं तं ब्रूयाच्च हृतौजसम् ३३
दोषे विबद्धे नष्टेऽग्नौ सर्वसम्पूर्णलक्षणः
असाध्यः सोऽन्यथा कृच्छ्रो भवेद्वैकल्यदोऽपि वा ३४
अन्यच्च सन्निपातोत्थो यत्र पित्तं पृथक् स्थितम्
त्वचि कोष्ठेऽथवा दाहं विदधाति पुरोऽनु वा ३५
तद्वद्वातकफौ शीतं दाहादिर्दुस्तरस्तयोः
शीतादौ तत्र पित्तेन कफे स्यन्दितशोषिते ३६
शीते शान्तेऽम्लको मूर्च्छा मदस्तृष्णा च जायते
दाहादौ पुनरन्ते स्युस्तन्द्राष्ठीववमिक्लमाः ३७
आगन्तुरभिघाताभिषङ्ग शापाभिचारतः
चतुर्धाऽत्र क्षतच्छेददाहाद्यैरभिघातजः ३८
श्रमाच्च तस्मिन्पवनः प्रायो रक्तं प्रदूषयन्
सव्यथाशोफवैवर्ण्यं सरुजं कुरुते ज्वरम् ३९
ग्रहावेशौषधिविषक्रोधभी शोककामजः
अभिषङ्गाद् ग्रहेणास्मिन्नकस्माद्धासरोदने ४०
ओषधीगन्धजे मूर्च्छा शिरोरुग्वमथुः क्षवः
विषान्मूर्च्छातिसारास्यश्यावतादाहहृद्ग्रदाः ४१
क्रोधात्कम्पः शिरोरुक् च प्रलापो भयशोकजे
कामाद्भ्रमोऽरुचिर्दाहो ह्रीनिद्राधीधृतिक्षयः ४२
ग्रहादौ सन्निपातस्य भयादौ मरुतस्त्रये
कोपः कोपेऽपि पित्तस्य यौ तु शापाभिचारजौ ४३
सन्निपातज्वरौ घोरौ तावसह्यतमौ मतौ
तत्राभिचारिकैर्मन्त्रैर्हूयमानस्य तप्यते ४४
पूर्वं चेतस्ततो देहस्ततो विस्फोटतृड्भ्रमैः
सदाहमूर्च्छैर्ग्रस्तस्य प्रत्यहं वर्द्धते ज्वरः ४५
इति ज्वरोऽष्टधा दृष्टः समासाद्द्विविधस्तु सः

शारीरो मानसः सौम्यस्तीक्ष्णोऽन्तर्बहिराश्रयः ४६
प्राकृतो वैकृतः साध्योऽसाध्यः सामो निरामकः
पूर्वं शरीरे शारीरे तापो मनसि मानसे ४७
पवने योगवाहित्वाच्छीतं श्लेष्मयुते भवेत्
दाहः पित्तयुते मिश्रं मिश्रेऽन्तसंश्रये पुनः ४८
ज्वरेऽधिकं विकाराः स्युरन्तः क्षोभो मलग्रहः
बहिरेव बहिर्वेगे तापोऽपि च सुसाध्यता ४९
वर्षाशरद्वसन्तेषु वाताद्यैः प्राकृतः क्रमात्
वैकृतोऽन्य स दुःसाध्यः प्रायश्च प्राकृतोऽनिलात् ५०
वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वितो ज्वरम्
कुर्यात् पित्तं च शरदि तस्य चानुबलं कफः ५१
तत्प्रकृत्या विसर्गाच्च तत्र नानशनाद्भयम्
कफो वसन्ते तमपि वातपित्तं भवेदनु ५२
बलवत्स्वल्पदोषेषु ज्वरः साध्योऽनुपद्रवः
सर्वथा विकृतिज्ञाने प्रागसाध्य उदाहृतः ५३
ज्वरोपद्रवतीक्ष्णत्व मग्लानिर्बहुमूत्रता
न प्रवृत्तिर्न विड् जीर्णा न क्षुत्सामज्वराकृतिः ५४
ज्वरवेगोऽधिकं तृष्णा प्रलापः श्वसनं भ्रमः
मलप्रवृत्तिरुत्क्लेशः पच्यमानस्य लक्षणम् ५५
जीर्णताऽमविपर्यासात्सप्तरात्रं च लङ्घनात्
ज्वरः पञ्चविधः प्रोक्तो मलकालबलाबलात् ५६
प्रायशः सन्निपातेन भूयसा तूपदिश्यते
सन्ततः सततोऽन्येद्युस्तृतीयकचतुर्थकौ ५७
धातुमूत्रशकृद्वाहिस्रोतसां व्यापिनो मलाः
तापयन्तस्तनुं सर्वां तुल्यदूष्यादिवर्द्धिताः ५८
बलिनो गुरवः स्तब्धा विशेषेण रसाश्रिताः
सन्ततं निष्प्रतिद्वन्द्वा ज्वरं कुर्युः सुदुःसहम् ५९
मलं ज्वरोष्मा धातून्वा स शीघ्रं क्षपयेत्ततः
सर्वाकारं रसादीनां शुद्ध्याऽशुद्ध्याऽपि वा क्रमात् ६०
वातपित्तकफैः सप्त दश द्वादश वासरान्

प्रायोऽनुयाति मर्यादां मोक्षाय च वधाय च ६१
इत्यग्निवेशस्य मतंहारीतस्य पुनः स्मृतिः
द्विगुणा सप्तमी यावन्नवम्येकादशी तथा ६२
एषा त्रिदोषमर्यादा मोक्षाय च वधाय च
शुद्ध्यशुद्धौ ज्वरः कालं दीर्घमप्यनुवर्तते ६३
कृशानां व्याधिमुक्तानां मिथ्याहारादिसेविनाम्
अल्पोऽपि दोषो दूष्यादेर्लब्ध्वाऽन्यतमतो बलम् ६४
सविपक्षो ज्वरं कुर्याद्विषमं क्षयवृद्धिभाक्
दोषः प्रवर्तते तेषां स्वे काले ज्वरयन् बली ६५
निवर्तते पुनश्चैष प्रत्यनीकबलाबलः
क्षीणे दोषे ज्वरः सूक्ष्मो रसादिष्वेव लीयते ६६
लीनत्वात्कार्श्यवैवर्ण्यजाड्यादीनादधाति सः
आसन्नविवृतास्यत्वात्स्रोतसां रसवाहिनाम् ६७
आशु सर्वस्य वपुषो व्याप्तिर्दोषेण जायते
सन्ततः सततस्तेन विपरीतो विपर्ययात् ६८
विषमो विषमारम्भक्रियाकालोऽनुषङ्गवान्
दोषो रक्ताश्रयः प्रायः करोति सततं ज्वरम् ६९
अहोरात्रस्य स द्विः स्यात् सकृदन्येद्युराश्रितः
तस्मिन्मांसवहा नाडीः मेदोनाडीस्तृतीयके ७०
ग्राही पित्तानिलान्मूर्ध्नस्त्रिकस्य कफपित्ततः
सपृष्ठस्यानिलकफात्स चैकाहान्तरः स्मृतः ७१
चतुर्थको मले मेदोमज्जास्थ्यन्यतमस्थिते
मज्जस्थ एवेत्यपरे प्रभावं स तु दर्शयेत् ७२
द्विधा कफेन जंघाभ्यां स पूर्वं शिरसोऽनिलात्
अस्थिमज्जोभयगते चतुर्थकविपर्ययः ७३
त्रिधा द्व्यहं ज्वरयति दिनमेकं तु मुञ्चति
बलाबलेन दोषाणामन्नचेष्टादिजन्मना ७४
ज्वरः स्यान्मनसस्तद्वत्कर्मणश्च तदा तदा
दोषदूष्यर्त्वहोरात्रप्रभृतीनां बलाज्ज्वरः ७५
मनसो विषयाणां च कालं तं तं प्रपद्यते

धातून् प्रक्षोभयन् दोषो मोक्षकाले विलीयते ७६
ततो नरः श्वसन् स्विद्यन् कूजन् वमति चेष्टते
वेपते प्रलपत्युष्णैः शीतैश्चाङ्गैर्हतप्रभः ७७
विसंज्ञो ज्वरवेगार्तः सक्रोध इव वीक्षते
सदोषशब्दं च शकृद्द्रवं सृजति वेगवत् ७८
देहो लघुर्व्यपगतक्लम मोहतापः
पाको मुखे करणसौष्ठवमव्यथत्वम्
स्वेदः क्षवः प्रकृतियोगि मनोऽन्नलिप्सा
कण्डूश्च मूर्ध्नि विगतज्वरलक्षणानि ७९
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां
तृतीये निदानस्थाने ज्वरनिदानं नाम द्वितीयोऽध्यायः २

तृतीयोऽध्यायः

अथातो रक्तपित्तकासनिदानं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
भृशोष्णतीक्ष्णकट्वम्ल लवणादिविदाहिभिः
कोद्रवोद्दालकैश्चान्नैस्तद्युक्तै रतिसेवितैः १
कुपितं पित्तलैः पित्तं द्रवं रक्तं च मूर्च्छिते
ते मिथस्तुल्यरूपत्वमागम्य व्याप्नुतस्तनुम् २
पित्तं रक्तस्य विकृतेः संसर्गाद्दूषणादपि
गन्धवर्णानुवृत्तेश्च रक्तेन व्यपदिश्यते ३
प्रभवत्यसृजः स्थानात्प्लीहतो यकृतश्च तत्
शिरोगुरुत्वमरुचिः शीतेच्छा धूमकोऽम्लकः ४
छर्दिश्छर्दितबैभत्स्यं कासः श्वासो भ्रमः क्लमः
लोहलोहितमत्स्यामगन्धास्यत्वं स्वरक्षयः ५
रक्तहारिद्रहरितवर्णता नयनादिषु
नीललोहितपीतानां वर्णानामविवेचनम् ६
स्वप्ने तद्वर्णदर्शित्वं भवत्यस्मिन् भविष्यति
ऊर्ध्वं नासाक्षिकर्णास्यैर्मेढ्रयोनिगुदैरधः ७
कुपितं रोमकूपैश्च समस्तैस्तत्प्रवर्तते

ऊर्ध्वं साध्यं कफाद्यस्मात्तद्विरेचनसाधनम् ८
बह्वौषधं च पित्तस्य विरेको हि वरौषधम्
अनुबन्धी कफो यश्च तत्र तस्यापि शुद्धिकृत् ९
कषायाः स्वादवोऽप्यस्य विशुद्धश्लेष्मणो हिताः
किमु तिक्ताः कषाया वा ये निसर्गात्कफापहाः १०
अधो याप्यं चलाद्यस्मात्तत्प्रच्छर्दनसाधनम्
अल्पौषधं च पित्तस्य वमनं न वरौषधम् ११
अनुबन्धी चलो यश्च शान्तयेऽपि न तस्य तत्
कषायाश्च हितास्तस्य मधुरा एव केवलम् १२
कफमारुतसंसृष्ट मसाध्यमुभयायनम्
अशक्यप्रातिलोम्यत्वादभावा दौषधस्य च १३
न हि संशोधनं किञ्चिदस्त्यस्य प्रतिलोमगम्
शोधनं प्रतिलोमं च रक्तपित्ते भिषग्जितम् १४
एवमेवोपशमनं सर्वशो नास्य विद्यते
संसृष्टेषु हि दोषेषु सर्वजिच्छमनं हितम् १५
तत्र दोषानुगमनं सिरास्र इव लक्षयेत्
उपद्रवांश्च विकृतिज्ञानतस्तेषु चाधिकम् १६
आशुकारी यतः कासस्तमेवातः प्रवक्ष्यति
पञ्च कासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः १७
क्षयायोपेक्षिताः सर्वे बलिनश्चोत्तरोत्तरम्
तेषां भविष्यतां रूपं कण्ठे कण्डूररोचकः १८
शूकपूर्णाभकण्ठत्वं तत्राधो विहतोऽनिलः
ऊर्ध्वं प्रवृत्तः प्राप्योरस्तस्मिन् कण्ठे च संसजन् १९
शिरःस्रोतांसि सम्पूर्य ततोऽङ्गान्युत्क्षिपन्निव
क्षिपन्निवाक्षिणी पृष्ठमुरः पार्श्वे च पीडयन् २०
प्रवर्तते स वक्त्रेण भिन्नकांस्योपमध्वनिः
हेतुभेदात्प्रतीघातभेदो वायोः सरंहसः २१
यद्रुजाशब्दवैषम्यं कासानां जायते ततः
कुपितो वातलैर्वातः शुष्कोरःकण्ठवक्त्रताम् २२
हृत्पार्श्वोरःशिरःशूलं मोहक्षोभस्वरक्षयान्

करोति शुष्कं कासं च महावेगरुजास्वनम् २३
सोऽङ्गहर्षी कफं शुष्कं कृच्छ्रान्मुक्त्वाऽल्पतां व्रजेत्
पित्तात्पीताक्षिकफता तिक्तास्यत्वं ज्वरो भ्रमः २४
पित्तासृग्वमनं तृष्णा वैस्वर्यं धूमकोऽम्लकः
प्रततं कासवेगेन ज्योतिषामिव दर्शनम् २५
कफादुरोऽल्परुङ्मूर्द्धहृदयं स्तिमितं गुरु
कण्ठोपलेपः सदनं पीनसच्छर्द्यरोचकाः २६
रोमहर्षो घनस्निग्धश्वेतश्लेष्मप्रवर्तनम्
युद्धाद्यैः साहसैस्तैस्तैः सेवितैरयथाबलम् २७
उरस्यन्तःक्षते वायुः पित्तेनानुगतो बली
कुपितः कुरुते कासं कफं तेन सशोणितम् २८
पीतं श्यावं च शुष्कं च ग्रथितं कुथितं बहु
ष्ठीवेत्कण्ठेन रुजता विभिन्नेनेव चोरसा २९
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना
पर्वभेदज्वरश्वास तृष्णावैस्वर्यकम्पवान् ३०
पारावत इवाकूजन् पार्श्वशूली ततोऽस्य च
क्रमाद्वीर्यं रुचिः पक्ता बलं वर्णश्च हीयते ३१
क्षीणस्य सासृङ्मूत्रत्वं स्याच्च पृष्ठकटीग्रहः
वायुप्रधानाः कुपिता धातवो राजयक्ष्मिणः ३२
कुर्वन्ति यक्ष्मायतनैः कासं ष्ठीवेत्कफं ततः
पूतिपूयोपमं पीतं विस्रं हरितलोहितम् ३३
लुच्येत इव पार्श्वे च हृदयं पततीव च
अकस्मादुष्णशीतेच्छा बह्वाशित्वं बलक्षयः ३४
स्निग्धप्रसन्नवक्त्रत्वं श्रीमद्दशननेत्रता
ततोऽस्य क्षयरूपाणि सर्वाण्याविर्भवन्ति च ३५
इत्येष क्षयजः कासः क्षीणानां देहनाशनः
याप्यो वा बलिनां तद्वत् क्षतजोऽभिनवौ तु तौ ३६
सिध्येतामपि सानाथ्यात् साध्या दोषैः पृथक् त्रयः
मिश्रा याप्या द्वयात्सर्वे जरसा स्थविरस्य च ३७
कासाच्छ्वासक्षयच्छर्दिस्वरसादादयो गदाः

भवन्त्युपेक्षया यस्मात्तस्मात्तं त्वरया जयेत् ३८
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां
तृतीये निदानस्थाने रक्तपित्तकासनिदानं नाम तृतीयोऽध्यायः ३

चतुर्थोऽध्यायः

अथातः श्वासहिध्मानिदानं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
कासवृद्ध्या भवेच्छ्वासः पूर्वैर्वा दोषकोपनैः
आमातिसारवमथुविष पाण्डुज्वरैरपि १
रजोधूमानिलैर्मर्म घातादतिहिमाम्बुना
क्षुद्रकस्तमकश्छिन्नो महानूर्ध्वश्च पञ्चमः २
कफोपरुद्धगमनः पवनो विष्वगास्थितः
प्राणोदकान्नवाहीनि दुष्टः स्रोतांसि दूषयन् ३
उरःस्थः कुरुते श्वासमामाशयसमुद्भवम्
प्राग्रूपं तस्य हृत्पार्श्वशूलं प्राणविलोमता ४
आनाहः शङ्खभेदश्च तत्रायासातिभोजनैः
प्रेरितः प्रेरयेत् क्षुद्रं स्वयं संशमनंमरुत् ५
प्रतिलोमं सिरा गच्छन्नुदीर्य पवनः कफम्
परिगृह्य शिरोग्रीवमुरः पार्श्वे च पीडयन् ६
कासं घुर्घुरकं मोहमरुचिं पीनसं तृषम्
करोति तीव्रवेगं च श्वासं प्राणोपतापिनम् ७
प्रताम्येत्तस्य वेगेन निष्ठ्यूतान्ते क्षणं सुखी
कृच्छ्राच्छयानःश्वसिति निषण्णः स्वास्थ्यमृच्छति ८
उच्छ्रिताक्षो ललाटेन स्विद्यता भृशमर्तिमान्
विशुष्कास्यो मुहुःश्वासी काङ्क्षत्युष्णं सवेपथुः ९
मेघाम्बुशीतप्राग्वातैः श्लेष्मलैश्च विवर्द्धते
स याप्यस्तमकः साध्यो नवो वा बलिनो भवेत् १०
ज्वरमूर्च्छायुतः शीतैः शाम्येत्प्रतमकस्तु सः
छिन्नाच्छ्वसिति विच्छिन्नं मर्मच्छेदरुजार्दितः ११
सस्वेदमूर्च्छः सानाहो बस्तिदाहनिरोधवान्

अधोदृग्विप्लुताक्षश्च मुह्यन् रक्तैकलोचनः १२
शुष्कास्यः प्रलपन् दीनो नष्टच्छायो विचेतनः
महता महता दीनो नादेन श्वसिति क्रथन् १३
उद्धूयमानः संरब्धो मत्तर्षभ इवानिशम्
प्रणष्टज्ञानविज्ञानो विभ्रान्तनयनाननः १४
वक्षः समाक्षिपन् बद्धमूत्रवर्चा विशीर्णवाक्
शुष्ककण्ठो मुहुर्मुह्यन् कर्णशङ्खशिरोतिरुक् १५
दीर्घमूर्ध्वं श्वसित्यूर्ध्वान्न च प्रत्याहरत्यधः
श्लेष्मावृतमुखस्रोताः क्रुद्धगन्धवहार्दितः १६
ऊर्ध्वदृग्वीक्षते भ्रान्तमक्षिणी परितः क्षिपन्
मर्मसु च्छिद्यमानेषु परिदेवी निरुद्धवाक् १७
एते सिद्ध्येयुरव्यक्ता व्यक्ताः प्राणहरा ध्रुवम्
इति श्वासनिदानम्
अथ हिध्मानिदानम्
श्वासैकहेतुप्राग्रूप सङ्ख्याप्रकृतिसंश्रयाः १८
हिध्माः भक्तोद्भवा क्षुद्रा यमला महतीति च
गम्भीरा च मरुत्तत्र त्वरयाऽयुक्तिसेवितैः १९
रूक्षतीक्ष्णखरासात्म्यैरन्नपानैः प्रपीडितः
करोति हिध्मामरुजां मन्दशब्दां क्षवानुगाम् २०
शमं सात्म्यान्नपानेन या प्रयाति च साऽन्नजा
आयासात्पवनः क्षुद्रः क्षुद्रां हिध्मां प्रवर्तयेत् २१
जत्रुमूलप्रविसृतामल्पवेगां मृदुं च सा
वृद्धिमायास्यतो याति भुक्तमात्रे च मार्दवम् २२
चिरेण यमलैर्वेगैराहारे या प्रवर्तते
परिणामोन्मुखे वृद्धिं परिणामे च गच्छति २३
कम्पयन्ती शिरोग्रीवमाध्मातस्यातितृष्यतः
प्रलापच्छर्द्यतीसार नेत्रविप्लुतिजृम्भिणः २४
यमला वेगिनी हिध्मा परिणामवती च सा
स्तब्धभ्रूशङ्खयुग्मस्य सास्रविप्लुतचक्षुषः २५
स्तम्भयन्ती तनुं वाचं स्मृतिं संज्ञां च मुष्णती

रुन्धती मार्गमन्नस्य कुर्वती मर्मघट्टनम् २६
पृष्ठतो नमनं शोषं महाहिध्मा प्रवर्तते
महामूला महाशब्दा महावेगा महाबला २७
पक्वाशयाद्वा नाभेर्वा पूर्ववद्या प्रवर्तते
तद्रूपा सा मुहुः कुर्याज्जृम्भामङ्गप्रसारणम् २८
गम्भीरेणानुनादेन गम्भीरा तासु साधयेत्
आद्ये द्वे वर्जयेदन्त्ये सर्वलिङ्गां च वेगिनीम् २९
सर्वाश्च सञ्चितामस्य स्थविरस्य व्यवायिनः
व्याधिभिः क्षीणदेहस्य भक्तच्छेदक्षतस्य वा ३०
इति हिध्मानिदानम्
सर्वेऽपि रोगा नाशाय न त्वेवं शीघ्रकारिणः
हिध्माश्वासौ यथा तौ हि मृत्युकाले कृतालयौ ३१

इति
श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविचितायामष्टाङ्गहृदयसंहितायांतृतीये निदानस्थाने श्वासहिध्मानिदानं नाम चतुर्थोऽध्यायः ४

पञ्चमोऽध्यायः

अथातो राजयक्ष्मादिनिदानं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
अथ राजयक्ष्मनिदानम्
अनेकरोगानुगतो बहुरोगपुरोगमः
राजयक्ष्मा क्षयः शोषो रोगराडिति च स्मृतः १
नक्षत्राणां द्विजानां च राज्ञोऽभूद्यदयं पुरा
यच्च राजा च यक्ष्मा च राजयक्ष्मा ततो मतः २
देहौषधक्षयकृतेः क्षयस्तत्सम्भवाच्च सः
रसादिशोषणाच्छोषो रोगराट् तेषु राजनात् ३
साहसं वेगसंरोधः शुक्रौजःस्नेहसङ्क्षयः
अन्नपानविधित्यागश्चत्वारस्तस्य हेतवः ४
तैरुदीर्णोऽनिलः पित्तं कफं चोदीर्य सर्वतः
शरीरसन्धीनाविश्य तान् सिराश्च प्रपीडयन् ५

मुखानि स्त्रोतसां रुद्ध्वा तथैवातिविवृत्य वा
सर्पन्नूर्ध्वमधस्तिर्यग्यथास्वं जनयेद्गदान् ६
रूपं भविष्यतस्तस्य प्रतिश्यायो भृशं क्षवः
प्रसेको मुखमाधुर्यं सदनं वह्निदेहयोः ७
स्थाल्यमत्रान्नपानादौ शुचावप्यशुचीक्षणम्
मक्षिकातृणकेशादिपातः प्रायोऽन्नपानयोः ८
हृल्लासश्छर्दिररुचिरश्नतोऽपि बलक्षयः
पाण्योरवेक्षा पादास्यशोफोऽक्ष्णोरतिशुक्लता ९
बाह्वोः प्रमाणजिज्ञासा काये वैभत्स्यदर्शनम्
स्त्रीमद्यमांसप्रियता घृणित्वं मूर्द्धगुण्ठनम् १०
नखकेशातिवृद्धिश्च स्वप्ने चाभिभवो भवेत्
पतङ्गकृकलासाहिकपि श्वापदपक्षिभिः ११
केशास्थितुषभस्मादिराशौ समधिरोहणम्
शून्यानां ग्रामदेशानां दर्शनं शुष्यतोऽम्भसः १२
ज्योतिर्गिरीणां पततां ज्वलतां च महीरुहाम्
पीनसश्वासकासां समूर्द्धस्वररुजोऽरुचिः १३
ऊर्ध्वं विड्भ्रंशसंशोषावधः च्छर्दिश्च कोष्ठगे
तिर्यक्स्थे पार्श्वरुग्दोषे सन्धिगे भवति ज्वरः १४
रूपाण्येकादशैतानि जायन्ते राजयक्ष्मिणः
तेषामुपद्रवान् विद्यात्कण्ठोद्ध्वंसमुरोरुजम् १५
जृम्भाङ्गमर्दनिष्ठीववह्नि सादास्यपूतिताः
तत्र वाताच्छिरःपार्श्वशूलमंसाङ्गमर्दनम् १६
कण्ठोद्ध्वंसः स्वरभ्रंशः पित्तात्पादांसपाणिषु
दाहोऽतिसारोऽसृक्छर्दिर्मुखगन्धो ज्वरो मदः १७
कफादरोचकश्छर्दिः कासो मूर्द्धाङ्गगौरवम्
प्रसेकः पीनसः श्वासः स्वरसादोऽल्पवह्निता १८
दोषैर्मन्दानलत्वेन सोपलेपैः कफोल्बणैः
स्त्रोतोमुखेषु रुद्धेषु धातूष्मस्वल्पकेषु च १९
विदह्यमानः स्वस्थाने रसस्तांस्तानुपद्रवान्
कुर्यादगच्छन्मांसादीनसृक् चोर्ध्वं प्रधावति २०

पच्यते कोष्ठ एवान्नमन्नपक्त्रैव चास्य यत्
प्रायोऽस्मान्मलतां यातं नैवालं धातुपुष्टये २१
रसोऽप्यस्य न रक्ताय मांसाय कुत एव तु
उपस्तब्धः स शकृता केवलं वर्तते क्षयी २२
लिङ्गेष्वल्पेष्वपि क्षीणं व्याध्यौषधबलाक्षमम्
वर्जयेत् साधयेदेव सर्वेष्वपि ततोऽन्यथा २३
इति राजयक्ष्मनिदानम्
अथ स्वरभेदनिदानम्
दोषैर्व्यस्तैः समस्तैश्च क्षयात् षष्ठश्च मेदसा
स्वरभेदो भवेत्तत्र क्षामो रूक्षश्चलः स्वरः २४
शूकपूर्णाभकण्ठत्वं स्निग्धोष्णोपशयोऽनिलात्
पित्तात्तालुगले दाहः शोष उक्तावसूयनम् २५
लिम्पन्निव कफात्कण्ठं मन्दः खुरखुरायते
स्वरो विबद्धः सर्वैस्तु सर्वलिङ्गः क्षयात्कषेत् २६
धूमायतीव चात्यर्थं मेदसा श्लेष्मलक्षणः
कृच्छ्रलक्ष्याक्षरश्चात्र सर्वैरन्त्यं च वर्जयेत् २७
इति स्वरभेदनिदानम्
अथारोचकनिदानम्
अरोचको भवेद्दोषैर्जिह्वाहृदयसंश्रयैः
सन्निपातेन मनसः सन्तापेन च पञ्चमः २८
कषायतिक्तमधुरं वातादिषु मुखं क्रमात्
सर्वोत्थे विरसं शोकक्रोधादिषु यथामलम् २९
इत्यरोचकनिदानम्
अथ छर्दिनिदानम्
छर्दिर्दोषैः पृथक्सर्वैर्द्विष्टैरर्थैश्च पञ्चमी
उदानो विकृतो दोषान् सर्वास्वप्यूर्ध्वमस्यति ३०
तासूत्क्लेशास्यलावण्य प्रसेकारुचयोऽग्रगाः
नाभिपृष्ठं रुजन् वायुः पार्श्वे चाहारमुत्क्षिपेत् ३१
ततो विच्छिन्नमल्पाल्पं कषायं फेनिलं वमेत्
शब्दोद्गारयुतं कृष्णमच्छं कृच्छ्रेण वेगवत् ३२

कासास्यशोषहृन्मूर्द्धस्वर पीडाक्लमान्वितः
पित्तात्क्षारोदकनिभं धूम्रं हरितपीतकम् ३३
सासृगम्लं कटूष्णं च तृरामूर्च्छातापदाहवत्
कफात् स्निग्धं घनंशीतं श्लेष्मतन्तुगवाच्चितम् ३४
मधुरं लवणं भूरि प्रसक्तं लोमहर्षणम्
मुखश्वयथुमाधुर्य तन्द्राहृल्लासकासवान् ३५
सर्वलिङ्गा मलैः सर्वै रिष्टोक्ता या च तांत्यजेत्
पूत्यमेध्याशुचिद्विष्ट दर्शनश्रवणादिभिः ३६
तप्ते चित्ते हृदि क्लिष्टे छर्दिर्द्विष्टार्थयोगजा
वातादीनेव विमृशेत्कृमितृष्णामदौहृदे ३७
शूलवेपथुहृल्लासैर्विशेषात् कृमिजां वदेत्
कृमि हृद्रोगलिङ्गैश्च
इति छर्दिनिदानम्
अथ हृद्रोगनिदानम
स्मृताः पञ्च तु हृद्गदाः ३८
तेषां गुल्मनिदानोक्तैः समुत्थानैश्च सम्भवः
वातेन शूल्यतेऽत्यर्थं तुद्यते स्फुटतीव च ३९
भिद्यते शुष्यति स्तब्धं हृदयं शून्यता द्रवः
अकस्माद्दीनता शोको भयं शब्दासहिष्णुता ४०
वेपथुर्वेष्टनं मोहः श्वासरोधोऽल्पनिद्रता
पित्तात्तृष्णा भ्रमो मूर्च्छा दाहः स्वेदोऽम्लकः क्लमः ४१
छर्दनं चाम्लपित्तस्य धूमकः पीतता ज्वरः
श्लेष्मणा हृदयं स्तब्धं भारिकं साश्मगर्भवत् ४२
कासाग्निसादनिष्ठीवनिद्रालस्या रुचिज्वराः
सर्वलिङ्गस्त्रिभिर्दोषैः कृमिभिः श्यावनेत्रता ४३
तमःप्रवेशो हृल्लासः शोषः कण्डूः कफस्रुतिः
हृदयं प्रततं चात्र क्रकचेनेव दार्यते ४४
चिकित्सेदामयं घोरं तं शीघ्रं शीघ्रकारिणम्
इति हृद्रोगनिदानम्
अथ तृष्णानिदानम्

वातात्पित्तात्कफात्तृष्णा सन्निपाताद्रसक्षयात् ४५
षष्ठी स्यादुपसर्गाच्च वातपित्ते तु कारणम्
सर्वासु तत्प्रकोपो हि सौम्यधातुप्रशोषणात् ४६
सर्वदेहभ्रमोत्कम्प तापतृड्दाहमोहकृत्
जिह्वामूलगलक्लोमतालुतोयवहाः सिराः ४७
संशोष्य तृष्णा जायन्ते तासां सामान्यलक्षणम्
मुखशोषो जलातृप्तिरन्नद्वेषः स्वरक्षयः ४८
कण्ठौष्ठजिह्वाकार्कश्यं जिह्वानिष्क्रमणं क्लमः
प्रलापश्चित्तविभ्रंशस्तृड्ग्रहोक्तास्तथाऽमयाः ४९
मारुतात् क्षामता दैन्यं शङ्खतोदः शिरोभ्रमः
गन्धाज्ञानास्यवैरस्यश्रुतिनिद्रा बलक्षयाः ५०
शीताम्बुपानाद्वृद्धिश्च पित्तान्मूर्च्छास्यतिक्तता
रक्तेक्षणत्वं प्रततं शोषो दाहोऽतिधूमकः ५१
कफो रुणद्धि कुपितस्तोयवाहिषु मारुतम्
स्रोतःसु स कफस्तेन पङ्कवच्छोष्यते ततः ५२
शूकैरिवाचितः कण्ठो निद्रा मधुरवक्त्रता
आध्मानं शिरसो जाड्यं स्तैमित्यच्छर्द्यरोचकाः ५३
आलस्यमविपाकश्च सर्वैः स्यात्सर्वलक्षणा
आमोद्भवा च भक्तस्य संरोधाद्वातपित्तजा ५४
उष्णक्लान्तस्य सहसा शीताम्भो भजतस्तृषम्
ऊष्मा रुद्धो गतः कोष्ठं यां कुर्यात्पित्तजैव सा ५५
या च पानातिपानोत्था तीक्ष्णाग्नेः स्नेहजा च या
स्निग्धगुर्वम्ललवणभोजनेन कफोद्भवा ५६
तृष्णा रसक्षयोक्तेन लक्षणेन क्षयात्मिका
शोषमेहज्वराद्यन्यदीर्घ रोगोपसर्गतः ५७
या तृष्णा जायते तीव्रा सोपसर्गात्मिका स्मृता ५७-२
इति तृष्णानिदानम्

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां
तृतीये शारीरस्थाने राजयक्ष्मादिनिदानं नाम पञ्चमोऽध्यायः ५

षष्ठोऽध्यायः

अथातो मदात्ययादिनिदानं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
तीक्ष्णोष्णरूक्षसूक्ष्माम्लं व्यवाय्याशुकरं लघु
विकाषि विशदं मद्यमोजसोऽस्माद्विपर्ययः १
तीक्ष्णादयो विषेऽप्युक्ताश्चित्तोपप्लाविनो गुणाः
जीवितान्ताय जायन्ते विषे तूत्कर्षवृत्तितः २
तीक्ष्णादिभिर्गुणैर्मद्यं मन्दादीनोजसो गुणान्
दशभिर्दश सङ्क्षोभ्य चेतो नयति विक्रियाम् ३
आद्ये मदे द्वितीये तु प्रमादायतने स्थितः
दुर्विकल्पहतो मूढः सुखमित्यधिमुच्यते ४
मध्यमोत्तमयोः सन्धिं प्राप्य राजसतामसः
निरङ्कुश इव व्यालो न किञ्चिन्नाचरेज्जडः ५
इयं भूमिरवद्यानां दौःशील्यस्येदमास्पदम्
एकोऽय बहुमार्गाया दुर्गतेर्देशिकः परम् ६
निश्चेष्टः शववच्छेते तृतीये तु मदे स्थितः
मरणादपि पापात्मा गतः पापतरां दशाम् ७
धर्माधर्मं सुखं दुःखमर्थानर्थं हिताहितम्
यदासक्तो न जानाति कथं तच्छीलयेद्बुधः ८
मद्ये मोहो भयं शोकः क्रोधो मृत्युश्च संश्रिताः
सोन्मादमदमूर्च्छायाः सापस्मारापतानकाः ९
यत्रैकः स्मृतिविभ्रंशस्तत्र सर्वमसाधु यत्
अयुक्तियुक्तमन्नं हि व्याधये मरणाय वा १०
मद्यं त्रिवर्गधीधैर्यलज्जादेरपि नाशनम्
नातिमाद्यन्ति बलिनः कृताहारा महाशनाः ११
स्निग्धाः सत्त्ववयोयुक्ता मद्यनित्यास्तदन्वयाः
मेदःकफाधिका मन्दवातपित्ता दृढाग्नयः १२
विपर्ययेऽतिमाद्यन्ति विश्रब्धाः कुपिताश्च ये
मद्येन चाम्लरूक्षेण साजीर्णे बहुनाऽति च १३
वातात्पित्तात्कफात्सर्वैश्चत्वारः स्युर्मदात्ययाः

सर्वेऽपि सर्वैर्जायन्ते व्यपदेशस्तु भूयसा १४
सामान्यं लक्षणं तेषां प्रमोहो हृदयव्यथा
विड्भेदः प्रततं तृष्णा सौम्याग्नेयो ज्वरोऽरुचिः १५
शिरःपार्श्वास्थिरुक्कम्पो मर्मभेदस्त्रिकग्रहः
उरोविबन्धस्तिमिरं कासः श्वासः प्रजागरः १६
स्वेदोऽतिमात्रं विष्टम्भः श्वयथुश्चित्तविभ्रमः
प्रलापश्छर्दिरुत्क्लेशो भ्रमो दुःस्वप्नदर्शनम् १७
विशेषाज्जागरश्वासकम्प मूर्धरुजोऽनिलात्
स्वप्ने भ्रमत्युत्पतति प्रेतैश्च सह भाषते १८
पित्ताद्दाहज्वरस्वेद मोहातीसारतृड्भ्रमाः
देहो हरितहारिद्रो रक्तनेत्रकपोलता १९
श्लेष्मणा छर्दिहृल्लासनिद्रोदर्दाङ्गगौरवम्
सर्वजे सर्वलिङ्गत्वम् मुक्त्वा मद्यं पिबेत्तु यः २०
सहसाऽनुचितं वाऽन्यत्तस्य ध्वंसकविक्षयौ
भवेतां मारुतात्कष्टौ दुर्बलस्य विशेषतः २१
ध्वंसके श्लेष्मनिष्ठीवः कण्ठशोषोऽतिनिद्रता
शब्दासहत्वं तन्द्रा च विक्षयेऽङ्गशिरोतिरुक् २२
हृत्कण्ठरोगः सम्मोहः कासस्तृष्णा वमिर्ज्वरः
निवृत्तो यस्तु मद्येभ्यो जितात्मा बुद्धिपूर्वकृत् २३
विकारैः स्पृश्यते जातु न स शारीरमानसैः
इति मदात्ययनिदानम्
रजोमोहाहिताहारपरस्य स्युस्त्रयो गदाः २४
रसासृक्चेतनावाहिस्रोतोरोध समुद्भवाः
मदमूर्च्छायसन्न्यासा यथोत्तरबलोत्तराः २५
अथ मदनिदानम्
मदोऽत्र दोषैः सर्वैश्च रक्तमद्यविषैरपि
सक्तानल्पद्रुताभाषश्चलः स्खलितचेष्टितः २६
रूक्षश्यावारुणतनुर्मदे वातोद्भवे भवेत्
पित्तेन क्रोधनो रक्तपीताभः कलहप्रियः २७
स्वल्पसम्बद्धवाक्पाण्डुः कफाद्ध्यानपरोऽलसः

सर्वात्मा सन्निपातेन रक्तात्स्तब्धाङ्गदृष्टिता २८
पित्तलिङ्गं च मद्येन विकृतेहास्वराङ्गता
विषे कम्पोऽतिनिद्रा च सर्वेभ्योऽभ्यधिकस्तु सः २९
लक्षयेल्लक्षणोत्कर्षाद्वातादीन् शोणितादिषु
इति मदनिदानम्
अथ मूर्च्छायनिदानम्
अरुणं कृष्णनीलं वा खं पश्यन्प्रविशेत्तमः ३०
शीघ्रं च प्रतिबुध्येत हृत्पीडा वेपथुर्भ्रमः
कार्श्यं श्यावारुणा छाया मूर्च्छाये मारुतात्मके ३१
पित्तेन रक्तं पीतं वा नभः पश्यन् विशेत्तमः
विबुध्येत च सस्वेदो दाहतृट्तापपीडितः ३२
भिन्नविरानीलपीताभो रक्तपीताकुलेक्षणः
कफेन मेघसंकाशं पश्यन्नाकाशमाविशेत् ३३
तमश्चिराच्च बुध्येत सहृल्लासः प्रसेकवान्
गुरुभिः स्तिमितैरङ्गैरार्द्रचर्मावनद्धवत् ३४
सर्वाकृतिस्त्रिभिर्दोषैरपस्मार इवापरः
पातयत्याशु निश्चेष्टं विना बीभत्सचेष्टितैः ३५
इति मूर्च्छायनिदानम्
अथ सन्न्यासनिदानम्
दोषेषु मदमूर्च्छायाः कृतवेगेषु देहिनाम्
स्वयमेवोपशाम्यन्ति सन्न्यासो नौषधैर्विना ३६
वाग्देहमनसां चेष्टामाक्षिप्यातिबला मलाः
सन्न्यासं सन्निपतिताः प्राणायतनसंश्रयाः ३७
कुर्वन्ति तेन पुरुषः काष्ठीभूतो मृतोपमः
म्रियेत शीघ्रं शीघ्रं चेच्चिकित्सा न प्रयुज्यते ३८
अगाधे ग्राहबहुले सलिलौघ इवातटे
सन्न्यासे विनिमज्जन्तं नरमाशु निवर्तयेत् ३९
इति सन्न्यासनिदानम्
मदमानरोषतोषप्रभृतिभिररिभिर्निजैः परिष्वङ्गः
युक्तायुक्तं च समं युक्तिवियुक्तेन मद्येन ४०

बलकालदेशसात्म्यप्रकृतिसहायामयवयांसि
प्रविभज्य तदनुरूपं यदि पिबति ततः पिबत्यमृतम् ४१
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां
तृतीये निदानस्थानेमदात्ययादिनिदानं नाम षष्ठोऽध्यायः ६

सप्तमोऽध्यायः

अथातोऽशसां निदानं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
अरिवत्प्राणिनो मांसकीलका विशसन्ति यत्
दोषास्त्वङ्मांसमेदांसि सन्दूष्य विविधाकृतीन् १
मांसाङ्कुरानपानादौ कुर्वन्त्यर्शांसि तान् जगुः २
सहजन्मोत्तरोत्थानभेदाद्द्वेधा समासतः
शुष्कस्राविविभेदाच्च गुदः स्थूलान्त्रसंश्रयः ३
अर्धपञ्चाङ्गुलस्तस्मिंस्तिस्त्रोऽध्यर्धाङ्गुलाः स्थिताः
वल्यः प्रवाहिणी तासामन्तर्मध्ये विसर्जनी ४
बाह्या संवरणी तस्या गुदौष्ठो बहिरङ्गुले
यवाध्यर्धः प्रमाणेन रोमाण्यत्र ततः परम् ५
तत्र हेतुः सहोत्थानां वलीबीजोपतप्तता
अर्शसांबीजतप्तिस्तु मातापित्रपचारतः ६
दैवाच्च ताभ्यां कोपो हि सन्निपातस्य तान्यतः
असाध्यान्येवमाख्याताः सर्वे रोगाः कुलोद्भवाः ७
सहजानि विशेषेण रूक्षदुर्दर्शनानि च
अन्तर्मुखानि पाण्डूनि दारुणोपद्रवाणि च ८
षोढाऽन्यानि पृथग्दोषसंसर्गनिचयास्त्रतः
शुष्काणि वातश्लेष्मभ्यामार्द्राणि त्वस्त्रपित्ततः ९
दोषप्रकोपहेतुस्तु प्रागुक्तस्तेन सादिते
अग्नौ मलेऽतिनिचितेपुनश्चातिव्यवायतः १०
यानसङ्क्षोभविषम कठिनोत्कटकासनात्
बस्तिनेत्राश्मलोष्ठोर्वीतल चैलादिघट्टनात् ११
भृशं शीताम्बुसंस्पर्शात्प्रततातिप्रवाहणात्

वातमूत्रशकृद्वेगधारणा त्तदुदीरणात् १२
ज्वरगुल्मातिसारामग्रहणी शोफपाण्डुभिः
कर्शनाद्विषमाभ्यश्च चेष्टाभ्यो योषितां पुनः १३
आमगर्भप्रपतना द्गर्भवृद्धिप्रपीडनात्
ईदृशैश्चापरैर्वायुरपानः कुपितो मलम् १४
पायोर्वलीषु तं धत्ते तास्वभिष्यण्णमूर्तिषु
जायन्तेऽशासि तत्पूर्वलक्षणं मन्दवह्निता १५
विष्टम्भः सक्थिसदनं पिण्डिकोद्वेष्टनं भ्रमः
सादोऽङ्गे नेत्रयोः शोफः शकृद्भेदोऽथवा ग्रहः १६
मारुतः प्रचुरो मूढः प्रायो नाभेरधश्चरन्
सरुक् सपरिकर्तश्च कृच्छ्रान्निर्गच्छति स्वनन् १७
अन्त्रकूजनमाटोपः क्षामतोद्गारभूरिता
प्रभूतं मूत्रमल्पा विडश्रद्धा धूमकोऽम्लकः १८
शिरःपृष्ठोरसां शूलमालस्यं भिन्नवर्णता
तन्द्रेन्द्रियाणां दौर्बल्यं क्रोधो दुःखोपचारता १९
आशङ्का ग्रहणीदोषपाण्डुगुल्मोदरेषु च
एतान्येव विवर्द्धन्ते जातेषु हतनामसु २०
निवर्तमानोऽपानो हि तैरधोमार्गरोधतः
क्षोभयन्ननिलानन्यान् सर्वेन्द्रियशरीरगान् २१
तथा मूत्रशकृत्पित्तकफान् धातूंश्च साशयान्
मृद्नात्यग्निं ततः सर्वो भवति प्रायशोऽशसः २२
कृशो भृशं हतोत्साहो दीनः क्षामोऽतिनिष्प्रभः
असारो विगतच्छायो जन्तुजुष्ट इव द्रुमः २३
कृत्स्नैरुपद्रवैर्ग्रस्तो यथोक्तैर्मर्मपीडनैः
तथा कासपिपासास्यवैरस्यश्वासपीनसैः २४
क्लमाङ्गभङ्ग वमथुक्षवथुश्वयथुज्वरैः
क्लैब्यबाधिर्यतैमिर्य शर्कराश्मरिपीडितः २५
क्षामभिन्नस्वरो ध्यायन्मुहुः ष्ठीवन्नरोचकी
सर्वपर्वा स्थिहृन्नाभिपायुवङ्क्षण शूलवान् २६
गुदेन स्रवता पिच्छां पुलाकोदकसन्निभाम्

विबद्धमुक्तं शुष्कार्द्रं पक्वामं चान्तराऽन्तरा २७
पाण्डु पीतं हरिद्रक्तं पिच्छिलं चोपवेश्यते
गुदाङ्कुरा बह्वनिलाः शुष्काश्चिमिचिमान्विताः २८
म्लानाःश्यावारुणाः स्तब्धा विषमाः परुषाः खराः
मिथो विसदृशा वक्रास्तीक्ष्णा विस्फुटिताननाः २९
बिम्बीकर्कन्धु खर्जूरकार्पासीफलसन्निभाः
केचित्कदम्बपुष्पाभाः केचित्सिद्धार्थकोपमाः ३०
शिरःपार्श्वांसकट्यू रुवङ्क्षणाभ्यधिकव्यथाः
क्षवथूद्गारविष्टम्भ हृद्ग्रहारोचकप्रदाः ३१
कासश्वासाग्निवैषम्य कर्णनादभ्रमावहाः
तैरार्तो ग्रथितं स्तोकं सशब्दं सप्रवाहिकम् ३२
रुक्फेनपिच्छानुगतं विबद्धमुपवेश्यते
कृष्णत्वङ्नखविण्मूत्रनेत्रवक्त्रश्च जायते ३३
गुल्मप्लीहोदराष्ठीलासम्भवस्तत एव च
पित्तोत्तरा नीलमुखा रक्तपीतासितप्रभाः ३४
तन्वस्रस्राविणो विस्रास्तनवो मृदवः श्लथाः
शुकजिह्वायकृत्खण्डजलौकोवक्त्रसन्निभाः ३५
दाहपाकज्वरस्वेद तृण्मूर्च्छारुचिमोहदाः
सोष्माणो द्रवनीलोष्णपीतरक्तामवर्चसः ३६
यवमध्या हरित्पीतहारिद्रत्वङ्नखादयः
श्लेष्मोल्बणा महामूला घना मन्दरुजः सिताः ३७
उच्छूनोपचिताः स्निग्धाः स्तब्धवृत्तगुरुस्थिराः
पिच्छिलाः स्तिमिताः श्लक्ष्णाः कण्ड्वाढ्याः स्पर्शनप्रियाः३८
करीरपनसास्थ्याभास्तथा गोस्तनसन्निभाः
वङ्क्षणानाहिनः पायुबस्तिनाभिविकर्तिनः ३९
सकासश्वासहृल्लास प्रसेकारुचिपीनसाः
मेहकृच्छ्रशिरोजाड्यशिशिर ज्वरकारिणः ४०
क्लैब्याग्निमार्दवच्छर्दिराम प्रायविकारदाः
वसाभसकफप्राज्यपुरीषाः सप्रवाहिकाः ४१
न स्रवन्ति न भिद्यन्ते पाण्डुस्निग्धत्वगादयः

संसृष्टलिङ्गाः संसर्गात् निचयात्सर्वलक्षणाः ४२
रक्तोल्बणा गुदेकीलाः पित्ताकृतिसमन्विताः
वटप्ररोहसदृशा गुञ्जाविद्रुमसन्निभाः ४३
तेऽत्यर्थं दुष्टमुष्णं च गाढविट्प्रतिपीडिताः
स्रवन्ति सहसा रक्तं तस्य चातिप्रवृत्तितः ४४
भेकाभः पीड्यते दुःखैः शोणितक्षयसम्भवैः
हीनवर्णबलोत्साहो हतौजाः कलुषेन्द्रियः ४५
मुद्गकोद्रवजूर्णाह्व करीरचणकादिभिः
रूक्षैः सङ्ग्राहिभिर्वायुः स्वे स्थाने कुपितो बली ४६
अधोवहानि स्रोतांसि संरुध्याधः प्रशोषयन्
पुरीषं वातविरामूत्रसङ्गं कुर्वीत दारुणम् ४७
तेन तीव्रा रुजा कोष्ठपृष्ठहृत्पार्श्वगा भवेत्
आध्मानमुदरावेष्टो हृल्लासः परिकर्तनम् ४८
बस्तौ च सुतरां शूलं गराडश्वयथुसम्भवः
पवनस्योर्ध्वगामित्वं ततश्च्छर्द्यरुचिज्वराः ४९
हृद्रोगग्रहणी दोषमूत्रसङ्गप्रवाहिकाः
बाधिर्यतिमिरश्वास शिरोरुक्कासपीनसाः ५०
मनोविकारस्तृष्णास्र पित्तगुल्मोदरादयः
ते ते च वातजा रोगा जायन्ते भृशदारुणाः ५१
दुर्नाम्नामित्युदावर्तः परमोऽयमुपद्रवः
वाताभिभूतकोष्ठानां तैर्विनाऽपि स जायते ५२
सहजानि त्रिदोषाणि यानि चाभ्यन्तरे बलौ
स्थितानि तान्यसाध्यानि याप्यन्तेऽग्निबलादिभिः ५३
द्वन्द्वजानि द्वितीयायां वलौ यान्याश्रितानि च
कृच्छ्रसाध्यानि तान्याहुः परिसंवत्सराणि च ५४
बाह्यायां तु वलौ जातान्येकदोषोल्बणानि च
अर्शांसि सुखसाध्यानि न चिरोत्पतितानि च ५५
मेढ्रादिष्वपि वक्ष्यन्ते यथास्वं नाभिजानि तु
गराडूपदास्यरूपाणि पिच्छिलानि मृदूनि च ५६
व्यानो गृहीत्वा श्लेष्माणं करोत्यर्शस्त्वचो बहिः

कीलोपमं स्थिरखरं चर्मकीलं तु तं विदुः ५७
वातेन तोदः पारुष्यं पित्तादसितरक्तता
श्लेष्मणा स्निग्धता तस्य ग्रथितत्वं सवर्णता ५८
अर्शसां प्रशमे यत्नमाशु कुर्वीत बुद्धिमान्
तान्याशु हि गुदं बद्ध्वा कुर्युर्बद्धगुदोदरम् ५९
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां
तृतीये निदानस्थानेऽशसां निदानं नाम सप्तमोऽध्यायः ७

अष्टमोऽध्यायः

अथातोऽतीसारग्रहणीदोषनिदानं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
दोषैर्व्यस्तैः समस्तैश्च भयाच्छोकाच्च षडिवधः
अतीसारः स सुतरां जायतेऽत्यम्बुपानतः १
कृशशुष्कामिषासात्म्यतिल पिष्टविरूढकैः
मद्यरूक्षातिमात्रान्नैरर्शोभिः स्नेहविभ्रमात् २
कृमिभ्यो वेगरोधाच्च तद्विधैः कुपितोऽनिलः
विस्रंसयत्यधोऽब्धातुं हत्वा तेनैव चानलम् ३
व्यापद्यानुशकृत्कोष्ठं पुरीषं द्रवतां नयन्
प्रकल्पतेऽतिसाराय लक्षणं तस्य भाविनः ४
तोदो हृद्गुदकोष्ठेषु गात्रसादो मलग्रहः
आध्मानमविपाकश्च तत्र वातेन विड्जलम् ५
अल्पाल्पं शब्दशूलाढ्यं विबद्धमुपवेश्यते
रूक्षं सफेनमच्छं च ग्रथितं वा मुहुर्मुहुः ६
तथा दग्धगुडाभासं सपिच्छापरिकर्तिकम्
शुष्कास्यो भ्रष्टपायुश्च हृष्टरोमा विनिष्टनन् ७
पित्तेन पीतमसितं हारिद्रं शाद्वलप्रभम्
सरक्तमतिदुर्गन्धं तृण्मूर्च्छास्वेददाहवान् ८
सशूलं पायुसन्तापपाकवान् श्लेष्मणा घनम्
पिच्छिलं तन्तुमच्छ्वेतं स्निग्धमामं कफान्वितम् ९
अभीक्ष्णं गुरु दुर्गन्धं विबद्धमनुबद्धरुक्

निद्रालुरलसोऽन्नद्विडल्पाल्पं सप्रवाहिकम् १०
सरोमहर्षः सोत्क्लेशो गुरुबस्तिगुदोदरः
कृतेऽप्यकृतसंज्ञश्च सर्वात्मा सर्वलक्षणः ११
भयेन क्षोभिते चित्ते सपित्तो द्रावयेच्छकृत्
वायुस्ततोऽतिसार्येत क्षिप्रमुष्णं द्रवं प्लवम् १२
वातपित्तसमं लिङ्गैराहुः तद्वच्च शोकतः
अतीसारः समासेन द्विधा सामो निरामकः १३
सासृङ्निरस्त्रः तत्राद्ये गौरवादप्सु मज्जति
शकृद्दुर्गन्ध माटोपविष्टम्भार्तिप्रसेकिनः १४
विपरीतो निरामस्तु कफात्पक्वोऽपि मज्जति
अतीसारेषु यो नातियत्नवान् ग्रहणीगदः १५
तस्य स्यादग्निविध्वंसकैरन्यस्य सेवितैः
सामं शकृन्निरामं वा जीर्णे येनातिसार्यते १६
सोऽतिसारोऽतिसरणादाशुकारी स्वभावतः
सामं सान्नमजीर्णेऽन्ने जीर्णे पक्वं तु नैव वा १७
अकस्माद्वा मुहुर्बद्धमकस्माच्छिथिलं मुहुः
चिरकृद्ग्रहणीदोषः सञ्चयाच्चोपवेशयेत् १८
स चतुर्धा पृथग्दोषैः सन्निपाताच्च जायते
प्राग्रूपं तस्य सदनं चिरात्पचनमम्लकः १९
प्रसेको वक्त्रवैरस्यमरुचिस्तृट्क्लमो भ्रमः
आनद्धोदरता छर्दिः कर्णक्ष्वेडोऽन्त्रकूजनम् २०
सामान्यं लक्षणं कार्श्यं धूमकस्तमको ज्वरः
मूर्च्छाशिरोरुग्विष्टम्भः श्वयथुः करपादयोः २१
तत्रानिलात्तालुशोषस्तिमिरं कर्णयोः स्वनः
पार्श्वोरुवङ्क्षणग्रीवारुजाऽभीक्ष्णं विषूचिका २२
रसेषु गृद्धिः सर्वेषु क्षुत्तृष्णा परिकर्तिका
जीर्णे जीर्यति चाध्मानं भुक्ते स्वास्थ्यं समश्नुते २३
वातहृद्रोगगुल्मार्शः प्लीहपाण्डुत्वशङ्कितः
चिराद्दुःखं द्रवं शुष्कं तन्वामं शब्दफेनवत् २४
पुनः पुनः सृजेद्वर्चः पायुरुक्श्वासकासवान्

पित्तेन नीलपीताभं पीताभः सृजति द्रवम् २५
पूत्यम्लोद्गारहृत्कण्ठ दाहारुचितृडर्दितः
श्लेष्मणा पच्यते दुःखमन्नं छर्दिररोचकः २६
आस्योपदेहनिष्ठी वकासहृल्लासपीनसाः
हृदयं मन्यते स्त्यानमुदरं स्तिमितं गुरु २७
उद्गारो दुष्टमधुरः सदनं स्त्रीष्वहर्षणम्
भिन्नामश्लेष्मसंसृष्ट गुरुवर्चःप्रवर्तनम् २८
अकृशस्यापि दौर्बल्यम् सर्वजे सर्वसङ्करः
विभागेऽङ्गस्य ये चोक्ता विषमाद्यास्त्रयोऽग्नयः २९
तेऽपि स्युर्ग्रहणीदोषाः समस्तु स्वास्थ्यकारणम्
वातव्याध्यश्मरी कुष्ठमेहोदरभगन्दराः
अर्शांसि ग्रहणीत्यष्टौ महारोगाः सुदुस्तराः ३०

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां
तृतीये निदानस्थानेऽतीसारग्रहणीदोषनिदानंनामाष्टमोऽध्यायः ८

नवमोऽध्यायः

अथातो मूत्राघातनिदानं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
बस्तिबस्ति शिरोमेढ्रकटी वृषणपायवः
एकसम्बन्धनाः प्रोक्ता गुदास्थिविवराश्रयाः १
अधोमुखोऽपि बस्तिर्हि मूत्रवाहिसिरामुखैः
पार्श्वेभ्यः पूर्यते सूक्ष्मैः स्यन्दमानैरनारतम् २
यैस्तैरेव प्रविश्यैनं दोषाः कुर्वन्ति विंशतिम्
मूत्राघातान् प्रमेहांश्च कृच्छ्रान्मर्मसमाश्रयान् ३
बस्तिवङ्क्षणमेढ्रार्तियुक्तोऽल्पाल्पं मुहुर्मुहुः
मूत्रयेद्वातजे कृच्छ्रे पैत्ते पीतं सदाहरुक् ४
रक्तं वां कफजे बस्तिमेढ्रगौरवशोफवान्
सपिच्छं सविबन्धं च सर्वैः सर्वात्मकं मलैः ५
यदा वायुर्मुखं बस्तेरावृत्य परिशोषयेत्
मूत्रं सपित्तं सकफं सशुक्रं वा तदा क्रमात् ६

सञ्जायतेऽश्मरी घोरा पित्ताद्गोरिव रोचना
श्लेष्माश्रया च सर्वा स्यात् अथास्याः पूर्वलक्षणम् ७
बस्त्याध्मानं तदासन्नदेशेषु परितोऽतिरुक्
मूत्रे च बस्तगन्धत्वं मूत्रकृच्छ्रं ज्वरोऽरुचिः ८
सामान्यलिङ्गं रुङ्नाभिसेवनीबस्तिमूर्धसु
विशीर्णधारं मूत्रं स्यात्तया मार्गनिरोधने ९
तद्व्यपायात्सुखं मेहेदच्छं गोमेदकोपमम्
तत्सङ्क्षोभात्क्षते सास्रमायासाच्चातिरुग्भवेत् १०
तत्र वाताद्भृशार्त्यार्तो दन्तान् खादति वेपते
मृद्नाति मेहनं नाभिं पीडयत्यनिशं क्वणन् ११
सानिलं मुञ्चति शकृन्मुहुर्मेहति बिन्दुशः
श्यावा रूक्षाऽश्मरी चास्य स्याच्चिता कण्टकैरिव १२
पित्तेन दह्यते बस्तिः पच्यमान इवोष्मवान्
भल्लातकास्थिसंस्थाना रक्ता पीताऽसिताऽश्मरी १३
बस्तिर्निस्तुद्यत इव श्लेष्मणा शीतलो गुरुः
अश्मरी महती श्लक्ष्णा मधुवर्णाऽथवा सिता १४
एता भवन्ति बालानां तेषामेव च भूयसा
आश्रयोपचयाल्पत्वाद्ग्रहणाहरणे सुखाः १५
शुक्राश्मरी तु महतां जायते शुक्रधारणात्
स्थानाच्च्युतममुक्तं हि मुष्कयोरन्तरेऽनिलः १६
शोषयत्युपसङ्गृह्य शुक्रं तच्छुष्कमश्मरी
बस्तिरुक्कृच्छ्रमूत्रत्वमुष्कश्वयथुकारिणी १७
तस्यामुत्पन्नमात्रायां शुक्रमेति विलीयते
पीडिते त्ववकाशेऽस्मिन् अश्मर्येव च शर्करा १८
अणुशो वायुना भिन्ना सा त्वस्मिन्ननुलोमगे
निरेति सह मूत्रेण प्रतिलोमे विबध्यते १९
मूत्रसन्धारिणः कुर्याद्रुद्ध्वा बस्तेर्मुखं मरुत्
मूत्रसङ्गं रुजं कण्डूं कदाचिच्च स्वधामतः २०
प्रच्याव्य बस्तिमुद्वृत्तं गर्भाभं स्थूलविप्लुतम्
करोति तत्र रुग्दाहस्पन्दनोद्वेष्टनानि च २१

बिन्दुशश्च प्रवर्तेत मूत्रं बस्तौ तु पीडिते
धारया द्विविधोऽप्येष वातबस्तिरिति स्मृतः २२
दुस्तरो दुस्तरतरो द्वितीयः प्रबलानिलः
शकृन्मार्गस्य बस्तेश्च वायुरन्तरमाश्रितः २३
अष्ठीलाभं घनं ग्रन्थिं करोत्यचलमुन्नतम्
वाताष्ठीलेति साऽध्मानविरामूत्रानिलसङ्गकृत् २४
विगुणः कुण्डलीभूतो बस्तौ तीव्रव्यथोऽनिलः
आविध्य मूत्रं भ्रमति सस्तम्भोद्वेष्टगौरवः २५
मूत्रमल्पाल्पमथवा विमुञ्चति शकृत्सृजन्
वातकुण्डलिकेत्येषा मूत्रं तु विधृतं चिरम् २६
न निरेति विबद्धं वा मूत्रातीतं तदल्परुक्
विधारणात्प्रतिहतं वातोदावर्तितं यदा २७
नाभेरधस्तादुदरं मूत्रमापूरयेत्तदा
कुर्यात्तीव्ररुगाध्मानमपक्तिं मलसङ्ग्रहम् २८
तन्मूत्रजठरम् छिद्रवैगुण्येनानिलेन वा
आक्षिप्तमल्पं मूत्रं तद्बस्तौ नालेऽथवा मणौ २९
स्थित्वा स्रवेच्छनैः पश्चात्सरुजं वाऽथ नीरुजम्
मूत्रोत्सङ्गः स विच्छिन्नतच्छेषगुरुशेफसः ३०
अन्तर्बस्तिमुखे वृत्तः स्थिरोऽल्प सहसा भवेत्
अश्मरीतुल्यरुक् ग्रन्थिर्मूत्रग्रन्थिः स उच्यते ३१
मूत्रितस्य स्त्रियं यातो वायुना शुक्रमुद्धतम्
स्थानाच्च्युतं मूत्रयतः प्राक् पश्चाद्वा प्रवर्तते ३२
भस्मोदकप्रतीकाशं मूत्रशुक्रं तदुच्यते
रूक्षदुर्बलयोर्वातादुदावर्तं शकृद्यदा ३३
मूत्रस्रोतोऽनुपर्येति संसृष्टं शकृता तदा
मूत्रं विट्तुल्यगन्धं स्याद्विडिवघातं तमादिशेत् ३४
पित्तं व्यायामतीक्ष्णोष्णभोजनाध्वातपादिभिः
प्रवृद्धं वायुना क्षिप्तं बस्त्युपस्थार्तिदाहवत् ३५
मूत्रं प्रवर्तयेत्पीतं सरक्तं रक्तमेव वा
उष्णं पुनः पुनः कृच्छ्रादुष्णवातं वदन्ति तम् ३६

रूक्षस्य क्लान्तदेहस्य बस्तिस्थौ पित्तमारुतौ
मूत्रक्षयं सरुग्दाहं जनयेतां तदाह्वयम् ३७
पित्तं कफो द्वावपि वा संहन्येतेऽनिलेन चेत्
कृच्छ्रान्मूत्रं तदा पीतं रक्तं श्वेतं घनं सृजेत् ३८
सदाहं रोचनाशङ्खचूर्णवर्णं भवेच्च तत्
शुष्कं समस्तवर्णं वा मूत्रसादं वदन्ति तम् ३९
इति विस्तरतः प्रोक्ता रोगा मूत्राप्रवृत्तिजाः
निदान लक्षणैरूर्ध्वं वक्ष्यन्तेऽति प्रवृत्तिजाः ४०

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने मूत्राघातनिदानं नाम नवमोऽध्यायः ९

दशमोऽध्यायः

अथातः प्रमेहनिदानं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
प्रमेहा विंशतिस्तत्र श्लेष्मतो दश पित्ततः
षट् चत्वारोऽनिलात् तेषां मेदोमूत्रकफावहम् १
अन्नपानक्रियाजातं यत्प्रायस्तत्प्रवर्तकम्
स्वाद्वम्ललवणस्निग्धगुरुपिच्छिलशीतलम् २
नवधान्यसुरानूप मांसेक्षुगुडगोरसम्
एकस्थानासनरतिः शयनं विधिवर्जितम् ३
बस्तिमाश्रित्य कुरुते प्रमेहान् दूषितः कफः
दूषयित्वा वपुः क्लेदस्वेदमेदोरसामिषम् ४
पित्तं रक्तमपि क्षीणे कफादौ मूत्रसंश्रयम्
धातून् बस्तिमुपानीय तत्क्षयेऽपि च मारुतः ५
साध्ययाप्यपरित्याज्या मेहास्तेनैव तद्भवाः
समासमक्रियतया महात्ययतयाऽपि च ६
सामान्यं लक्षणं तेषां प्रभूताविलमूत्रता
दोषदूष्याविशेषेऽपि तत्संयोगविशेषतः ७
मूत्रवर्णादिभेदेन भेदो मेहेषु कल्प्यते
अच्छं बहु सितं शीतं निर्गन्धमुदकोपमम् ८

मेहत्युदकमेहेन किञ्चिच्चाविलपिच्छिलम्
इक्षो रसमिवात्यर्थं मधुरं चेक्षुमेहतः ९
सान्द्रीभवेत्पर्युषितं सान्द्रमेहेन मेहति
सुरामेही सुरातुल्यमुपर्यच्छमधो घनम् १०
संहृष्टरोमा पिष्टेन पिष्टवद्बहलं सितम्
शुक्राभं शुक्रमिश्रं वा शुक्रमेही प्रमेहति ११
मूर्ताणून् सिकतामेही सिकतारूपिणो मलान्
शीतमेही सुबहुशो मधुरं भृशशीतलम् १२
शनैः शनैः शनैर्मेही मन्दंमन्दं प्रमेहति
लालातन्तुयुतं मूत्रं लालामेहेन पिच्छिलम् १३
गन्धवर्णरसस्पर्शैः क्षारेण क्षारतोयवत्
नीलमेहेन नीलाभं कालमेही मषीनिभम् १४
हारिद्रमेही कटुकं हरिद्रासन्निभं दहत्
विस्रं माञ्जिष्ठमेहेन मञ्जिष्ठासलिलोपमम् १५
विस्रमुष्णं सलवणं रक्ताभं रक्तमेहतः
वसामेही वसामिश्रं वसां वा मूत्रयेन्मुहुः १६
मज्जानं मज्जमिश्रं वा मज्जमेही मुहुर्मुहुः
हस्ती मत्त इवाजस्रं मूत्रं वेगविवर्जितम् १७
सलसीकं विबद्धं च हस्तिमेही प्रमेहति
मधुमेही मधुसमम् जायते स किल द्विधा १८
क्रुद्धे धातुक्षयाद्वायौ दोषावृतपथेऽथवा
आवृतो दोषलिङ्गानि सोऽनिमित्तं प्रदर्शयेत् १९
क्षीणः क्षणात्क्षणात् पूर्णो भजते कृच्छ्रसाध्यताम्
कालेनोपेक्षिताः सर्वे यद्यान्ति मधुमेहताम् २०
मधुरं यच्च सर्वेषु प्रायो मध्विव मेहति
सर्वेऽपि मधुमेहाख्या माधुर्याच्च तनोरतः २१
अविपाकोऽरुचिश्च्छर्दिर्निद्रा कासः सपीनसः
उपद्रवाः प्रजायन्ते मेहानां कफजन्मनाम् २२
बस्तिमेहनयोस्तोदो मुष्कावदरणं ज्वरः
दाहस्तृष्णाऽम्लको मूर्च्छा विड्भेदः पित्तजन्मनाम् २३

वातिकानामुदावर्तकम्पहृद् ग्रहलोलताः
शूलमुन्निद्रता शोषः कासः श्वासश्च जायते २४
शराविका कच्छपिका जालिनी विनताऽलजी
मसूरिका सर्षपिका पुत्रिणी सविदारिका २५
विद्रधिश्चेति पिटिकाः प्रमेहोपेन्नया दश
सन्धिमर्मसु जायन्ते मांसलेषु च धामसु २६
अन्तोन्नता मध्यनिम्ना श्यावा क्लेदरुजान्विता
शरावमानसंस्थाना पिटिका स्याच्छराविका २७
अवगाढार्तिनिस्तोदा महावस्तुपरिग्रहा
श्लक्ष्णा कच्छपपृष्ठाभा पिटिका कच्छपी मता २८
स्तब्धा सिराजालवती स्निग्धस्रावा महाशया
रुजानिस्तोदबहुला सूक्ष्मच्छिद्रा च जालिनी २९
अवगाढरुजाक्लेदा पृष्ठे वा जठरेऽपि वा
महती पिटिका नीला विनता विनता स्मृता ३०
दहति त्वचमुत्थाने भृशं कष्टा विसर्पिणी
रक्तकृष्णाऽतितृट्स्फोटदाहमोहज्वराऽलजी ३१
पानसंस्थानयोस्तुल्या मसूरेण मसूरिका
सर्षपामानसंस्थाना क्षिप्रपाका महारुजा ३२
सर्षपी सर्षपातुल्यपिटिकापरिवारिता
पुत्रिणी महती भूरिसुसूक्ष्मपिटिकाचिता ३३
विदारीकन्दवद्वृत्ता कठिना च विदारिका
विद्रधिर्वक्ष्यतेऽन्यत्र तत्राद्यं पिटिकात्रयम् ३४
पुत्रिणी च विदारी च दुःसहा बहुमेदसः
सह्याः पित्तोल्बणास्त्वन्याः सम्भवन्त्यल्पमेदसः ३५
तासु मेहवशाच्च स्याद्दोषोद्रेको यथायथम्
प्रमेहेण विनाऽप्येता जायन्ते दुष्टमेदसः
तावच्च नोपलक्ष्यन्ते यावद्वस्तुपरिग्रहः ३६
हारिद्रवर्णं रक्तं वा मेहप्राग्रूपवर्जितम्
यो मूत्रयेन्न तं मेहं रक्तपित्तं तु तद्विदुः ३७
स्वेदोऽङ्ग गन्धः शिथिल त्वमङ्गे

शय्यासनस्वप्न सुखाभिषङ्गः
हृन्नेत्र जिह्वा श्रवणोपदेहो
घनाङ्गता केशनखातिवृद्धिः३८
शीत प्रियत्वं गलतालुशोषो
माधुर्यमास्ये करपाददाहः
भविष्यतो मेहगणस्य रूपं
मूत्रेऽभिधावन्ति पिपीलिकाश्च ३९
दृष्ट्वा प्रमेहं मधुरं सपिच्छं
मधूपमं स्याद्द्विविधो विचारः
सम्पूरणाद्वा कफसम्भवः स्यात्
क्षीणेषु दोषेष्वनिलात्मको वा ४०
सपूर्वरूपाः कफ पित्तमेहाः
क्रमेण ये वातकृताश्च मेहाः
साध्या न ते पित्तकृतास्तु याप्याः
साध्यास्तु मेदो यदि नातिदुष्टम् ४१

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां
तृतीये निदानस्थाने प्रमेहनिदानं नाम दशमोऽध्यायः १०

एकादशोऽध्यायः

अथातो विद्रधिवृद्धिगुल्मनिदानं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
भुक्तैः पर्युषितात्युष्ण रूक्षशुष्कविदाहिभिः
जिह्मशय्याविचेष्टाभिस्तैस्तैश्चा सृक्प्रदूषणैः १
दुष्टत्वङ्मांसमेदोस्थिस्नाय्व सृक्कण्डराश्रयः
यः शोफो बहिरन्तर्वा महामूलो महारुजः २
वृत्तः स्यादायतो यो वा स्मृतः षोढा स विद्रधिः
दोषैः पृथक्समुदितैः शोणितेन क्षतेन च ३
बाह्योऽत्र तत्रतत्राङ्गे दारुणो ग्रथितोन्नतः
आन्तरो दारुणतरो गम्भीरो गुल्मवद्घनः ४
वल्मीकवत्समुच्छ्रायी शीघ्रघात्यग्निशस्त्रवत्

नाभिबस्तियकृत्प्लीह क्लोमहृत्कुक्षिवङ्क्षणे ५
स्याद्वृक्कयोरपाने च वातात्तत्रातितीव्ररुक्
श्यावारुणश्चिरोरत्थानपाको विषमसंस्थितिः ६
व्यधच्छेदभ्रमानाहस्पन्द सर्पणशब्दवान्
रक्तताम्रासितः पित्तात्तृरामोहज्वरदाहवान् ७
क्षिप्रोत्थानप्रपाकश्च पाराडुः कराडूयुतः कफात्
सोत्क्लेशशीतकस्तम्भजृम्भा रोचकगौरवः ८
चिरोत्थानविपाकश्च सङ्कीर्णः सन्निपाततः
सामर्थ्याच्चात्र विभजेद्बाह्याभ्यन्तरलक्षणम् ९
कृष्णस्फोटावृतः श्यावस्तीव्रदाहरुजाज्वरः
पित्तलिङ्गोऽसृजा बाह्यः स्त्रीणामेव तथाऽन्तरः १०
शस्त्राद्यैरभिघातेन क्षते वाऽपथ्यकारिणः
क्षतोष्मा वायुविक्षिप्तः सरक्तं पित्तमीरयन् ११
पित्तासृग्लक्षणं कुर्याद्विद्रधिं भूर्युपद्रवम्
तेषूपद्रवभेदश्च स्मृतोऽधिष्ठानभेदतः १२
नाभ्यां हिध्मा भयेद्बस्तौ मूत्रं कृच्छ्रेण पूति च
श्वासो यकृति रोधस्तु प्लीह्न्युच्छ्वासस्य तृट् पुनः १३
गलग्रहश्च क्लोम्नि स्यात्सर्वाङ्गप्रग्रहो हृदि
प्रमोहस्तमकः कासो हृदये घट्टनं व्यथा १४
कुक्षिपार्श्वान्तरांसार्तिः कुक्षावाटोपजन्म च
सक्थ्नोर्ग्रहो वङ्क्षणयोर्वृक्कयोः कटिपृष्ठयोः १५
पार्श्वयोश्च व्यथा पायौ पवनस्य निरोधनम्
आमपक्वविदग्धत्वं तेषां शोफवदादिशेत् १६
नाभेरूर्ध्वं मुखात्पक्वाः प्रस्रवन्त्यधरे गुदात्
गुदास्यान्नाभिजो विद्याद्दोषं क्लेदाच्च विद्रधौ १७
यथास्वं व्रणवत् तत्र विवर्ज्यः सन्निपातजः
पक्वो हृन्नाभिबस्तिस्थो भिन्नोऽन्तर्बहिरेव वा १८
पक्वश्चान्तः स्रवन् वक्त्रात् क्षीणस्योपद्रवान्वितः
एवमेव स्तनसिरा विवृताः प्राप्य योषिताम् १९
सूतानां गर्भिणीनां वा सम्भवेच्छ्वयथुर्घनः

स्तने सदुग्धेऽदुग्धे वा बाह्यविद्रधिलक्षणः २०
नाडीनां सूक्ष्मवक्त्रत्वात्कन्यानां न स जायते
इति विद्रधिनिदानम्
अथ वृद्धिनिदानम्
क्रुद्धो रुद्धगतिर्वायुः शोफशूलकरश्चरन् २१
मुष्कौ वङ्क्षणतः प्राप्य फलकोशाभिवाहिनीः
प्रपीड्य धमनीर्वृद्धिं करोति फलकोशयोः २२
दोषास्रमेदोमूत्रान्त्रैः स वृद्धिः सप्तधा गदः
मूत्रान्त्रजावप्यनिलाद्धेतुभेदस्तु केवलम् २३
वातपूर्णदृतिस्पर्शो रूक्षो वातादहेतुरुक्
पक्वोदुम्बरसङ्काशः पित्ताद्दाहोष्मपाकवान् २४
कफाच्छीतो गुरुः स्निग्धः कण्डूमान् कठिनोऽल्परुक्
कृष्णस्फोटावृतः पित्तवृद्धिलिङ्गश्च रक्ततः २५
कफवन्मेदसा वृद्धिर्मृदुस्तालफलोपमः
मूत्रधारणशीलस्य मूत्रजः स तु गच्छतः २६
अम्भोभिः पूर्णदृतिवत्क्षोभं याति सरुङ्मृदुः
मूत्रकृच्छ्रमधस्ताच्च वलयं फलकोशयोः २७
वातकोपिभिराहारैः शीततोयावगाहनैः
धारणेरणभाराध्वविषमाङ्ग प्रवर्तनैः २८
क्षोभणैः क्षुभितोऽन्यैश्च क्षुद्रान्त्रावयवं यदा
पवनो विगुणीकृत्य स्वनिवेशादधो नयेत् २९
कुर्याद्वङ्क्षणसन्धिस्थो ग्रन्थ्याभं श्वयथुं तदा
उपेक्ष्यमाणस्य च मुष्कवृद्धि
माध्मानरुक्स्तम्भवतीं स वायुः
प्रपीडितोऽन्त स्वनवान् प्रयाति
प्रध्मापयन्नेति पुनश्च मुक्तः ३०
अन्त्रवृद्धिरसाध्योऽय वातवृद्धिसमाकृतिः ३१
इति वृद्धिनिदानम्
अथ गुल्मनिदानम्
रूक्षकृष्णारुणसिरातन्तु जालगवाक्षितः

गुल्मोऽष्टधा पृथग्दोषैः संसृष्टैर्निचयं गतैः ३२
आर्तवस्य च दोषेण नरीणां जायतेऽष्टमः
ज्वरच्छर्द्यतिसाराद्यैर्वमनाद्यैश्च कर्मभिः ३३
कर्शितो वातलान्यत्ति शीतं वाऽम्बु बुभुक्षितः
यः पिबत्यनु चान्नानि लङ्घनप्लवनादिकम् ३४
सेवते देहसङ्क्षोभि छर्दिं वा समुदीरयेत्
अनुदीर्णामुदीर्णान्वा वातादीन्न विमुञ्चति ३५
स्नेहस्वेदावनभ्यस्य शोधनं वा निषेवते
शुद्धो वाऽशुविदाहीनि भजते स्यन्दनानि वा ३६
वातोल्बणास्तस्य मलाः पृथक् क्रुद्धा द्विशोऽथवा
सर्वे वा रक्तयुक्ता वा महास्रोतोनुशायिनः ३७
ऊर्ध्वाधोमार्गमावृत्य कुर्वते शूलपूर्वकम्
स्पर्शोपलभ्यं गुल्माख्यमुत्प्लुतं ग्रन्थिरूपिणम् ३८
कर्शनात्कफविट्पित्तैर्मार्गस्यावरणेन वा
वायुः कृताश्रयः कोष्ठे रौक्ष्यात्काठिन्यमागतः ३९
स्वतन्त्रः स्वाश्रये दुष्टः परतन्त्रः पराश्रये
पिण्डितत्वादमूर्तोऽपि मूर्तत्वमिव संश्रितः ४०
गुल्म इत्युच्यते बस्तिनाभिहृत्पार्श्वसंश्रयः
वातान्मन्याशिरःशूलं ज्वरप्लीहान्त्रकूजनम् ४१
व्यधः सूच्येव विट्सङ्गः कृच्छ्रादुच्छ्वसनं मुहुः
स्तम्भो गात्रे मुखे शोषः कार्श्यं विषमवह्निता ४२
रूक्षकृष्णत्वगादित्वं चलत्वादनिलस्य च
अनिरूपितसंस्थानस्थानवृद्धिक्षयव्यथः ४३
पिपीलिकाव्याप्त इव गुल्मः स्फुरति तुद्यते
पित्ताद्दाहोऽम्लको मूर्च्छाविड्भेदस्वेदतृड्ज्वराः ४४
हारिद्रत्वं त्वगाद्येषु गुल्मश्च स्पर्शनासहः
दूयते दीप्यते सोष्मा स्वस्थानं दहतीव च ४५
कफात्स्तैमित्यमरुचिः सदनं शिशिरज्वरः
पीनसालस्यहृल्लासकासशुक्लत्वगादिताः ४६
गुल्मोऽवगाढः कठिनो गुरुः सुप्तः स्थिरोऽल्परुक्

स्वदोषस्थानधामानः स्वे स्वे काले च रुक्कराः ४७
प्रायः त्रयस्तु द्वन्द्वोत्था गुल्माः संसृष्टलक्षणाः
सर्वजस्तीव्ररुग्दाहः शीघ्रपाकी घनोन्नतः ४८
सोऽसाध्यो रक्तगुल्मस्तु स्त्रिया एव प्रजायते
ऋतौ वा नवसूता वा यदि वा योनिरोगिणी ४९
सेवते वातलानि स्त्री क्रुद्धस्तस्याः समीरणः
निरुणद्ध्यार्तवं योन्यां प्रतिमासमवस्थितम् ५०
कुक्षिं करोति तद्गर्भलिङ्गमाविष्करोति च
हृल्लासदौहृदस्तन्यदर्शनक्षामतादिकम् ५१
क्रमेण वायुसंसर्गात्पित्तयोनितया च तत्
शोणितं कुरुते तस्या वातपित्तोत्थगुल्मजान् ५२
रुक्स्तम्भदाहातीसारतृड् ज्वरादीनुपद्रवान्
गर्भाशये च सुतरां शूलं दुष्टासृगाश्रये ५३
योन्याश्च स्रावदौर्गन्ध्यतोदस्पन्दनवेदनाः
न चाङ्गैर्गर्भवद्गुल्मः स्फुरत्यपि तु शूलवान् ५४
पिण्डीभूतः स एवास्याः कदाचित्स्पन्दते चिरात्
न चास्या वर्द्धते कुक्षिर्गुल्म एव तु वर्द्धते ५५
स्वदोषसंश्रयो गुल्मः सर्वो भवति तेन सः
पाकं चिरेण भजते नैव वा विद्रधिः पुनः ५६
पच्यते शीघ्रमत्यर्थं दुष्टरक्ताश्रयत्वतः
अतःशीघ्रविदाहित्वाद्विद्रधिः सोऽभिधीयते ५७
गुल्मेऽन्तराश्रये बस्तिकुक्षिहृत्प्लीहवेदनाः
अग्निवर्णबलभ्रंशो वेगानां चाप्रवर्तनम् ५८
अतो विपर्ययो बाह्ये कोष्ठाङ्गेषु तु नातिरुक्
वैवर्ण्यमवकाशस्य बहिरुन्नतताऽधिकम् ५९
इति गुल्मनिदानम्
साटोपमत्युग्ररुजमाध्मानमुदरे भृशम्
ऊर्ध्वाधोवातरोधेन तमानाहं प्रचक्षते ६०
घनोऽष्ठीलोपमो ग्रन्थिरष्ठीलोर्ध्वं समुन्नतः
आनाहलिङ्गस्तिर्यक्तु प्रत्यष्ठीला तदाकृतिः ६१

पक्वाशयाद्गुदोपस्थं वायुस्तीव्ररुजः प्रयान्
तूनी प्रतूनी तु भवेत्स एवातो विपर्यये ६२
उद्गारबाहुल्य पुरीषबन्ध तृप्त्यक्षमत्वान्त्र विकूजनानि
आटोपमाध्मान मपक्तिशक्ति मासन्नगुल्मस्य वदन्ति चिह्नम् ६३
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयंसहितायां
तृतीये निदानस्थानेविद्रधिवृद्धिगुल्मनिदानं नामैकादशोऽध्यायः ११

द्वादशोऽध्यायः

अथात उदरनिदानं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
रोगाः सर्वेऽपि मन्देऽग्नौ सुतरामुदराणि तु
अजीर्णान्मलिनैश्चान्नैर्जायन्ते मलसञ्चयात् १
ऊर्ध्वाधो धातवो रुद्ध्वा वाहिनीरम्बुवाहिनीः
प्राणाग्न्यपानान् सन्दूष्य कुर्युस्त्वङ्मांससन्धिगाः २
आध्माप्य कुक्षिमुदरम् अष्टधा तच्च भिद्यते
पृथग्दोषैः समस्तैश्च प्लीहबद्धक्षतोदकैः ३
तेनार्ताः शुष्कताल्वोष्ठाः शूनपादकरोदराः
नष्टचेष्टाबलाहाराः कृशाः प्रध्मातकुक्षयः ४
स्युः प्रेतरूपाः पुरुषाः भाविनस्तस्य लक्षणम्
क्षुन्नाशोऽन्न चिरात्सर्वं सविदाहं च पच्यते ५
जीर्णाजीर्णं न जानाति सौहित्यं सहते न च
क्षीयते बलतः शश्वच्छ्वसित्यल्पेऽपि चेष्टिते ६
वृद्धिर्विशोऽप्रवृत्तिश्च किञ्चिच्छोफश्च पादयोः
रुग्बस्तिसन्धौ ततता लघ्वल्पाभोजनैरपि ७
राजीजन्म वलीनाशो जठरे जठरेषु तु
सर्वेषु तन्द्रा सदनं मलसङ्गोऽल्पवह्निता ८
दाहः श्वयथुराध्मानमन्ते सलिलसम्भवः
सर्वं त्वतोयमरुणमसोफं नातिभारिकम् ९
गवाक्षितं सिराजालैः सदा गुडगुडायते
नाभिमन्त्रं च विष्टभ्य वेगं कृत्वा प्रणश्यति १०

मारुतो हृत्कटीनाभिपायुवङ्क्षणवेदनाः
सशब्दो निश्चरेद्वायुर्विड्बद्धा मूत्रमल्पकम् ११
नातिमन्दोऽनलो लौल्यं न च स्याद्विरसं मुखम्
तत्र वातोदरे शोफः पाणिपान्मुष्ककुक्षिषु १२
कुक्षिपार्श्वोदरकटी पृष्ठरुक् पर्वभेदनम्
शुष्ककासोऽङ्गमर्दोऽधोगुरुता मलसङ्ग्रहः १३
श्यावारुणत्वगादित्व मकस्माद्वृद्धिह्रासवत्
सतोदभेदमुदरं तनुकृष्णसिराततम् १४
आध्मातदृतिवच्छब्दमाहतं प्रकरोति च
वायुश्चात्र सरुक्शब्दो विचरेत्सर्वतोगतिः १५
पित्तोदरे ज्वरो मूर्च्छा दाहस्तृट् कटुकास्यता
भ्रमोऽतिसारः पीतत्वं त्वगादावुदरं हरित् १६
पीतताम्रसिरानद्धं सस्वेदं सोष्म दह्यते
धूमायति मृदुस्पर्शं क्षिप्रपाकं प्रदूयते १७
श्लेष्मोदरेऽङ्गसदनं स्वापः श्वयथुगौरवम्
निद्रोत्क्लेशारुचिश्वासकासशुक्लत्वगादिता १८
उदरं स्तिमितं श्लक्ष्णं शुक्लराजीततं महत्
चिराभिवृद्धि कठिनं शीतस्पर्शं गुरु स्थिरम् १९
त्रिदोषकोपनैस्तैस्तैः स्त्रीदत्तैश्च रजोमलैः
गरदूषीविषाद्यैश्च सरक्ताः सञ्चिता मलाः २०
कोष्ठं प्राप्य विकुर्वाणाः शोषमूर्च्छाभ्रमान्वितम्
कुर्युस्त्रिलिङ्गमुदरं शीघ्रपाकं सुदारुणम् २१
बाधते तच्च सुतरां शीतवाताभ्रदर्शने
अत्याशितस्य सङ्क्षोभाद्यानयानादिचेष्टितैः २२
अतिव्यवायकर्माध्व वमनव्याधिकर्शनैः
वामपार्श्वाश्रितः प्लीहाच्युतः स्थानाद्विवर्द्धते २३
शोणितं वा रसादिभ्यो विवृद्धं तं विवर्द्धयेत्
सोऽष्ठीलेवातिकठिनः प्राक् ततः कूर्मपृष्ठवत् २४
क्रमेण वर्द्धमानश्च कुक्षावुदरमावहेत्
श्वासकासपिपासास्यवैर स्याध्मानरुग्ज्वरैः २५

पाण्डुत्वमूर्च्छाछर्दीभिर्दाहमोहैश्च संयुतम्
अरुणाभं विवर्णं वा नीलहारिद्रराजिमत् २६
उदावर्तरुजानाहैर्मोहतृड्दहनज्वरैः
गौरवारुचिकाठिन्यैर्विद्यात्तत्र मलान् क्रमात् २७
प्लीहवद्दक्षिणात्पार्श्वात् कुर्याद्यकृदपि च्युतम्
पक्ष्मवालैः सहान्नेन भुक्तैर्बद्धायने गुदे २८
दुर्नामभिरुदावर्तैरन्यैर्वाऽन्त्रो पलोपिभिः
वर्चःपित्तकफान् रुद्ध्वा करोति कुपितोऽनिलः २९
अपानो जठरं तेन स्युर्दाहज्वरतृट्क्षवाः
कासश्वासोरुसदनं शिरोहृन्नाभिपायुरुक् ३०
मलसङ्गोऽरुचिश्च्छर्दिरुदरं मूढमारुतम्
स्थिरं नीलारुणसिराराजिनद्धमराजि वा ३१
नाभेरुपरि च प्रायो गोपुच्छाकृति जायते
अस्थ्यादिशल्यैः सान्नैश्चेद्भुक्तैरत्यशनेन वा ३२
भिद्यते पच्यते वाऽन्त्र तच्छिद्रैश्च स्रवन्बहिः
आम एव गुदादेति ततोऽल्पाल्पं सविड्रसः ३३
तुल्यः कुणपगन्धेन पिच्छिलः पीतलोहितः
शेषश्चापूर्य जठरं जठरं घोरमावहेत् ३४
वर्द्धयेत्तदधो नाभेराशु चैति जलात्मताम्
उद्रिक्तदोषरूपं च व्याप्तं च श्वासतृड्भ्रमैः ३५
छिद्रोदरमिदं प्राहुः परिस्त्रावीति चापरे
प्रवृत्तस्नेहपानादेः सहसाऽमाम्बुपायिनः ३६
अत्यम्बुपानान्मन्दाग्नेः क्षीणस्यातिकृशस्य वा
रुद्ध्वाऽम्बुमार्गाननिलः कफश्च जलमूर्च्छितः ३७
वर्धयेतां तदेवाम्बु तत्स्थानादुदराश्रितौ
ततः स्यादुदरं तृष्णागुदस्त्रुतिरुजान्वितम् ३८
कासश्वासारुचियुतं नानावर्णसिराततम्
तोयपूर्णदृतिस्पर्शं शब्दप्रक्षोभवेपथु ३९
दकोदरं महत्स्निग्धं स्थिरमावृत्तनाभि तत्
उपेक्षया च सर्वेषु दोषाः स्वस्थानतश्च्युताः ४०

पाकाद्द्रवा द्रवीकुर्युः सन्धिस्रोतोमुखान्यपि
स्वेदश्च बाह्यस्रोतःसु विहतस्तिर्यगास्थितः ४१
तदेवोदकमाप्याय्य पिच्छां कुर्यात्तदा भवेत्
गुरूदरं स्थिरं वृत्तमाहतं च न शब्दवत् ४२
मृदु व्यपेतराजीकं नाभ्यां स्पृष्टं च सर्पति
तदनूदकजन्मास्मिन्कुक्षिवृद्धिस्ततोऽधिकम् ४३
सिरान्तर्धानमुदकजठरोक्तं च लक्षणम्
वातपित्तकफप्लीहसन्निपातोदकोदरम् ४४
कृच्छ्रं यथोत्तरम् पक्षात्परं प्रायोऽपरे हतः
सर्वं च जातसलिलं रिष्टोक्तोपद्रवान्वितम् ४५
जन्मनैवोदरं सर्वं प्रायः कृच्छ्रतमं मतम्
बलिनस्तदजाताम्बु यत्नसाध्यं नवोत्थितम् ४६
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां
तृतीये निदानस्थानेउदरनिदानं नाम द्वादशोऽध्यायः १२

त्रयोदशोऽध्यायः

अथातः पाण्डुरोगशोफविसर्पनिदानं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
पित्तप्रधानाः कुपिता यथोक्तैः कोपनैर्मलाः
तत्रानिलेन बलिना क्षिप्तं पित्तं हृदि स्थितम् १
धमनीर्दश सम्प्राप्य व्याप्नुवत्सकलां तनुम्
श्लेष्मत्वग्रक्तमांसानि प्रदूष्यान्तरमाश्रितम् २
त्वङ्मांसयोस्तत्कुरुते त्वचि वर्णान् पृथग्विधान्
पाण्डुहारिद्रहरितान् पाण्डुत्वं तेषु चाधिकम् ३
यतोऽत पाण्डुरित्युक्तः स रोगः तेन गौरवम्
धातूनां स्याच्च शैथिल्यमोजसश्च गुणक्षयः ४
ततोऽल्परक्तमेदस्को निःसारः स्याच्छ्लथेन्द्रियः
मृद्यमानेरिवाङ्गैर्ना द्रवता हृदयेन च ५
शूनाक्षिकूटः सदनः कोपनः ष्ठीवनोऽल्पवाक्
अन्नद्विट् शिशिरद्वेषी शीर्णरोमा हतानलः ६

सन्नसक्थो ज्वरी श्वासी कर्णक्ष्वेडी भ्रमी श्रमी
स पञ्चधा पृथग्दोषैः समस्तैर्मृत्तिकादनात् ७
प्राग्रूपमस्य हृदयस्पन्दनं रूक्षता त्वचि
अरुचिः पीतमूत्रत्वं स्वेदाभावोऽल्पवह्निता ८
सादः श्रमो अनिलात्तत्र गात्ररुक्तोदकम्पनम्
कृष्णारूक्षारुणसिरानखविरामूत्रनेत्रता ९
शोफानाहास्यवैरस्यविट्शोषाः पार्श्वमूर्धरुक्
पित्ताद्धरितपीताभसिरादित्वं ज्वरस्तमः १०
तृट्स्वेदमूर्च्छाशीतेच्छा दौर्गन्ध्यं कटुवक्त्रता
वर्चोभेदोऽम्लको दाहः कफाच्छुक्लसिरादिता ११
तन्द्रा लवणवक्त्रत्वं रोमहर्षः स्वरक्षयः
कासश्च्छर्दिश्च निचयान्मिश्रलिङ्गोऽतिदुःसहः १२
मृत्कषायाऽनिलं पित्तमूषरा मधुरा कफम्
दूषयित्वा रसादींश्च रौक्ष्याद्भुक्तं विरूक्ष्य च १३
स्रोतांस्यपक्वैवापूर्य कुर्याद्रुद्ध्वा च पूर्ववत्
पाण्डुरोगं ततः शूननाभिपादास्यमेहनः १४
पुरीषं कृमिमन्मूञ्चेद्भिन्नं सासृक्कफं नरः
यः पाण्डुरोगी सेवेत पित्तलं तस्य कामलाम् १५
कोष्ठशाखाश्रयां पित्तं दग्ध्वाऽसृङ्मांसमावहेत्
हारिद्रनेत्रमूत्रत्वङ् नखवक्त्रशकृत्तया १६
दाहाविपाकतृष्णावान् भेकाभो दुर्बलेन्द्रियः
भवेत्पित्तोल्बणस्यासौ पाण्डुरोगादृतेऽपि च १७
उपेक्षया च शोफाढ्या सा कृच्छ्रा कुम्भकामला
हरितश्यावपीतत्वं पाण्डुरोगे यदा भवेत् १८
वातपित्ताद्भ्रमस्तृष्णा स्त्रीष्वहर्षो मृदुर्ज्वरः
तन्द्राबलानलभ्रंशो लोढरं तं हलीमकम् १९
अलसं चेति शंसन्ति तेषां पूर्वमुपद्रवाः
शोफप्रधानाः कथिताः स एवातो निगद्यते २०
इति पाण्डुरोगनिदानम्
अथ शोफनिदानम्

पित्तरक्तकफान्वायुर्दुष्टो दुष्टान् बहिःसिराः
नीत्वा रुद्धगतिस्तैर्हि कुर्यात्त्वङ्मांससंश्रयम् २१
उत्सेधं संहतं शोफं तमाहुर्निचयादतः
सर्वं हेतुविशेषैस्तु रूपभेदान्नवात्मकम् २२
दोषैः पृथग्द्वयैः सर्वैरभिघाताद्विषादपि
द्विधा वा निजमागन्तुं सर्वाङ्गैकाङ्गजं च तम् २३
पृथून्नतग्रथितताविशेषैश्च त्रिधा विदुः
सामान्यहेतुः शोफानां दोषजानां विशेषतः २४
व्याधिकर्मोपवासादिक्षीणस्य भजतो द्रुतम्
अतिमात्रमथान्यस्य गुर्वम्लस्निग्धशीतलम् २५
लवणक्षारतीक्ष्णोष्णशाकाम्बु स्वप्नजागरम्
मृद्ग्राम्यमांसवल्लूरमजीर्णश्रममैथुनम् २६
पदातेर्मार्गगमनं यानेन क्षोभिणाऽपि वा
श्वासकासातिसारार्शोजठर प्रदरज्वराः २७
विषूच्यलसकच्छर्दि गर्भवीसर्पपाण्डवः
अन्ये च मिथ्योपक्रान्तास्तैर्दोषा वक्षसि स्थिताः २८
ऊर्ध्वं शोफमधो बस्तौ मध्ये कुर्वन्ति मध्यगाः
सर्वाङ्गगाः सर्वगतं प्रत्यङ्गेषु तदाश्रयाः २९
तत्पूर्वरूपं दवथुः सिरायामोऽङ्गगौरवम्
वाताच्छोफश्चलो रूक्षः खररोमाऽरुणासितः ३०
सङ्कोचस्पन्दहर्षार्तितोद मेदप्रसुप्तिमान्
क्षिप्रोत्थानशमः शीघ्रमुन्नमेत्पीडितस्तनुः ३१
स्निग्धोष्णमर्दनैः शाम्येद्रात्रावल्पो दिवा महान्
त्वक् च सर्षपलिप्तेव तस्मिंश्चिमिचिमायते ३२
पीतरक्तासिताभासः पित्तादाताम्ररोमकृत्
शीघ्रानुसारप्रशमो मध्ये प्राग्जायते तनुः ३३
सतृड्दाहज्वर स्वेददवक्लेदमदभ्रमः
शीताभिलाषी विड्मेदी गन्धी स्पर्शासहो मृदुः ३४
कण्डूमान् पाण्डुरोमत्वक्कठिनः शीतलो गुरुः
स्निग्धः श्लक्ष्णः स्थिरःस्त्यानो निद्राच्छर्द्यग्निसादकृत् ३५

अक्रान्तो नोन्नमेत्कृच्छ्रशमजन्मा निशाबलः
स्त्रवेन्नासृक् चिरात्पिच्छां कुशशस्त्रादिविक्षतः ३६
स्पर्शोष्णकाङ्क्षी च कफात् यथास्वं द्वन्द्वजास्त्रयः
सङ्कराद्धेतुलिङ्गानाम् निचयान्निचयात्मकः ३७
अभिघातेन शस्त्रादिच्छेदभेदक्षतादिभिः
हिमानिलोदध्यनिलैर्भल्ला तकपिकच्छुजैः ३८
रसैः शूकैश्च संस्पर्शाच्छ्वयथुः स्याद्विसर्पवान्
भृशोष्मा लोहिताभासः प्रायशः पित्तलक्षणः ३९
विषजः सविषप्राणिपरिसर्पणमूत्रणात्
दंष्ट्रादन्तनखापाता दविषप्राणिनामपि ४०
विरामूत्रशुक्रोपहतमलवद्वस्त्र सङ्करात्
विषवृक्षानिलस्पर्शाद्गरयोगा वचूर्णनात् ४१
मृदुश्चलोऽवलम्बी च शीघ्रो दाहरुजाकरः
नवोऽनुपद्रवः शोफःसाध्योऽसाध्यःपुरेरितः ४२
इति शोफनिदानम्
अथ विसर्पनिदानम्
स्याद्विसर्पोऽभिघातान्तैदोषैर्दूष्यैश्च शोफवत्
त्र्यधिष्ठानं च तं प्राहुर्बाह्यान्तरुभयाश्रयात् ४३
यथोत्तरं च दुःसाध्याः तत्र दोषा यथायथम्
प्रकोपणैः प्रकुपिता विशेषेण विदाहिभिः ४४
देहे शीघ्रं विसर्पन्ति तेऽन्तरन्तःस्थिता बहिः
बहिःस्था द्वितये द्विस्थाः विद्यात्तत्रान्तराश्रयम् ४५
मर्मोपतापात्सम्मोहादयनानां विघट्टनात्
तृष्णातियोगाद्वेगानां विषमं च प्रवर्तनात् ४६
आशु चाग्निबलभ्रंशादतो बाह्यं विपर्ययात्
तत्र वातात्परीसर्पो वातज्वरसमव्यथः ४७
शोफस्फुरणनिस्तोद मेदायामार्तिहर्षवान्
पित्ताद्द्रुतगतिः पित्तज्वरलिङ्गोऽतिलोहितः ४८
कफात्कण्डूयुतः स्निग्धः कफज्वरसमानरुक्
स्वदोषलिङ्गैश्चीयन्ते सर्वे स्फोटैरुपेक्षिताः ४९

ते पक्वभिन्नाः स्वं स्वं च बिभ्रति व्रणलक्षणम्
वातपित्ताज्ज्वरच्छर्दि मूर्च्छातीसारतृड्भ्रमैः ५०
अस्थिभेदाग्नि सदनतमका रोचकैर्युतः
करोति सर्वमङ्गं च दीप्ताङ्गारावकीर्णवत् ५१
यं यं देशं विसर्पश्च विसर्पति भवेत्स सः
शान्ताङ्गारासितो नीलो रक्तो वाऽशु च चीयते ५२
अग्निदग्ध इव स्फोटैः शीघ्रगत्वाद् द्रुतं च सः
मर्मानुसारी वीसर्पः स्याद्वातोऽतिबलस्ततः ५३
व्यथेताङ्गं हरेत्संज्ञां निद्रां च श्वासमीरयेत्
हिध्मां च स गतोऽवस्थामीदृशीं लभते न ना ५४
क्वचिच्छर्मारतिग्रस्तो भूमिशय्यासनादिषु
चेष्टमानस्ततः क्लिष्टो मनोदेहश्रमोद्भवाम् ५५
दुष्प्रबोधोऽश्नुते निद्रां सोऽग्निवीसर्प उच्यते
कफेन रुद्धः पवनो भित्त्वा तं बहुधा कफम् ५६
रक्तं वा वृद्धरक्तस्य त्वक्सिरास्नावमांसगम्
दूषयित्वा च दीर्घाणुवृत्तस्थूलखरात्मनाम् ५७
ग्रन्थीनां कुरुते मालां रक्तानां तीव्ररुग्ज्वराम्
श्वासकासातिसारास्य शोषहिध्मावमिभ्रमैः ५८
मोहवैवर्ण्यमूर्च्छाङ्गभङ्गाग्नि सदनैर्युताम्
इत्ययं ग्रन्थिवीसर्पः कफमारुतकोपजः ५९
कफपित्ताज्ज्वरः स्तम्भो निद्रातन्द्राशिरोरुजः
अङ्गावसादविक्षेप प्रलापारोचकभ्रमाः ६०
मूर्च्छाग्निहानिर्भेदोऽस्था पिपासेन्द्रियगौरवम्
आमोपवेशनं लेपः स्रोतसां स च सर्पति ६१
प्रायेणामाशये गृह्णन्नेकदेशं न चातिरुक्
पिटकैरवकीर्णोऽतिपीत लोहितपाण्डुरैः ६२
मेचकाभोऽसितः स्निग्धो मलिनः शोफवान् गुरुः
गम्भीरपाकः प्राज्योष्मा स्पृष्टः क्लिन्नोऽवदीर्यते ६३
पङ्कवच्छीर्णमांसश्च स्पष्टस्नायुसिरागणः
शवगन्धिश्च वीसर्पं कर्दमाख्यमुशन्ति तम् ६४

सर्वजो लक्षणैः सर्वैः सर्वधात्वतिसर्पणः
बाह्यहेतोः क्षतात्क्रुद्धः सरक्तं पित्तमीरयन् ६५
विसर्पं मारुतः कुर्यात् कुलत्थसदृशैश्चितम्
स्फोटैः शोफज्वररुजादाहाढ्यं श्यावलोहितम् ६६
पृथग्दोषैस्त्रयः साध्या द्वन्द्वजाश्चानुपद्रवाः
असाध्यौ क्षतसर्वोत्थौ सर्वे चाक्रान्तमर्मकाः ६७
शीर्णस्नायुसिरामांसाः प्रक्लिन्नाः शवगन्धयः६७॥१४२ इति विसर्पनिदानम्
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने पाण्डुरोगशोफविसर्पनिदानंनाम त्रयोदशोऽध्यायः १३

चतुर्दशोऽध्यायः

अथातः कुष्ठश्वित्रकृमिनिदानं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
मिथ्याहारविहारेण विशेषेण विरोधिना
साधुनिन्दावधान्यस्वहरणाद्यैश्च सेवितैः १
पाप्मभिः कर्मभिः सद्यः प्राक्तनैर्वेरिता मलाः
सिराः प्रपद्य तिर्यग्गास्त्वग्लसीकासृगामिषम् २
दूषयन्ति श्लथीकृत्य निश्चरन्तस्ततो बहिः
त्वचः कुर्वन्ति वैवर्ण्यं दुष्टाः कुष्ठमुशन्ति तत् ३
कालेनोपेक्षितं यस्मात्सर्वं कुष्णाति तद्वपुः
प्रपद्य धातून्व्याप्यान्तः सर्वान् संक्लेद्य चावहेत् ४
सस्वेदक्लेदसङ्कोथान् कृमीन् सूक्ष्मान् सुदारुणान्
लोमत्वक्स्नायुधमनीतरुणास्थीनि यैः क्रमात् ५
भक्षयेच्छ्वित्रमस्माच्च कुष्ठवाह्यमुदाहृतम्
कुष्ठानि सप्तधा दोषैः पृथङ्मिश्रैः समागतैः ६
सर्वेष्वपि त्रिदोषेषु व्यपदेशोऽधिकत्वतः
वातेन कुष्ठं कापालं पित्तादौदुम्बरंकफात् ७
मण्डलाख्यं विचर्चीं च ऋक्षाख्यं वातपित्तजम्
चर्मैककुष्ठकिटिभसिध्माल सविपादिकाः ८
वातश्लेष्मोद्भवाः श्लेष्मपित्ताद्दद्रुशतारुषी

पुण्डरीकं सविस्फोटं पामा चर्मदलं तथा ९
सर्वैः स्यात्काकणं पूर्वं त्रिकं दद्रु सकाकणम्
पुण्डरीकर्क्षजिह्वे च महाकुष्ठानि सप्त तु १०
अतिश्लक्ष्णखर स्पर्शखेदास्वेदविवर्णताः
दाहः कण्डूस्त्वचि स्वापस्तोदः कोठोन्नतिः श्रमः ११
व्रणानामधिकं शूलं शीघ्रोत्पत्तिश्चिरस्थितिः
रूढानामपि रूक्षत्वं निमित्तेऽल्पेऽपि कोपनम् १२
रोमहर्षोऽसृजः कार्ष्ण्यं कुष्ठलक्षणमग्रजम्
कृष्णारुणकपालाभं रूक्षं सुप्तं खरं तनु १३
विस्तृतासमपर्यन्तं हृषितैर्लोमभिश्चितम्
तोदाढ्यमल्पकण्डूकं कापालं शीघ्रसर्पि च १४
पक्वोदुम्बरताम्रत्वग्रोम गौरसिराचितम्
बहलं बहलक्लेदरक्तं दाहरुजाधिकम् १५
आशूत्थानावदरणकृमि विद्यादुदुम्बरम्
स्थिरं स्त्यानं गुरु स्निग्धं श्वेतरक्तमनाशुगम् १६
अन्योन्यसक्तमुत्सन्नं बहुकण्डूस्त्रुतिक्रिमि
श्लक्ष्णपीताभपर्यन्तं मण्डलं परिमण्डलम् १७
सकण्डूपिटिका श्यावा लसीकाढ्या विचर्चिका
परुषं तनु रक्तान्तमन्तःश्यावं समुन्नतम् १८
सतोददाहरुक्क्लेदं कर्कशैः पिटिकैश्चितम्
ॠक्षजिह्वाकृति प्रोक्तमृक्षजिह्वं बहुक्रिमि १९
हस्तिचर्मखरस्पर्शं चर्म एकाख्यं महाश्रयम्
अस्वेदं मत्स्यशकलसन्निभम् किटिभं पुनः २०
रूक्षं किणखरस्पर्शं कण्डूमत्परुषासितम्
सिध्मं रूक्षं बहिः स्निग्धमन्तघृष्टं रजः किरेत् २१
श्लक्ष्णस्पर्शं तनु श्वेतताम्रं दौग्धिकपुष्पवत्
प्रायेण चोर्ध्वकाये स्यात् गण्डैः कण्डूयुतश्चितम् २२
रक्तैरलसकम् पाणिपाददार्यो विपादिकाः
तीव्रार्त्यो मन्दकण्ड्वश्च सरागपिटिकाचिताः २३
दीर्घप्रताना दूर्वावदतसीकुसुमच्छविः

उत्सन्नमराडला दद्रूः कराडूमत्यनुषङ्गिणी २४
स्थूलमूलं सदाहार्ति रक्तश्यावं बहुव्रणम्
शतारुः क्लेदजन्त्वाढ्यं प्रायशः पर्वजन्म च २५
रक्तान्तमन्तरा पाराडु कराडूदाहरुजान्वितम्
सोत्सेधमाचितं रक्तैः पद्मपत्रमिवांशुभिः २६
घनभूरिलसीकासृक्प्रायमाशु विभेदि च
पुराडरीकम् तनुत्वग्भिश्चितं स्फोटैः सितारुणैः २७
विस्फोटम् पिटिकाः पामा कराडूक्लेदरुजाधिकाः
सूद्माः श्यावारुणा बह्व्यः प्रायः स्फिक्पाणिकूर्परे २८
सस्फोटमस्पर्शसहं कराडूषातोददाहवत्
रक्तं दलच्चर्मदलम् काकणं तीव्रदाहरुक् २९
पूर्वं रक्तं च कृष्णं च काकणन्तीफलोपमम्
कूष्ठलिङ्गैर्युतं सर्वैर्नैकवर्णं ततो भवेत् ३०
दोषभेदीयविहितैरादिशेल्लिङ्ग कर्मभिः
कुष्ठेषु दोषोल्बणताम् सर्वदोषोल्बणं त्यजेत् ३१
रिष्टोक्तं यच्च यच्चास्थिमज्ञशुक्रसमाश्रयम्
याप्यं मेदोगतम् कृच्छ्रं पित्तद्वन्द्वास्त्रमांसगम् ३२
अकृच्छ्रं कफवाताढ्यं त्वक्स्थमेकमलं च यत्
तत्र त्वचि स्थिते कुष्ठे तोदवैवर्ण्यरूद्मताः ३३
स्वेदस्वापश्वयथवः शोणितेपिशिते पुनः
पाणिपादाश्रिताः स्फोटाःक्लेदः सन्धिषु चाधिकम् ३४
कौरयं गतिद्मयोऽङ्गानां दलनं स्याच्च मेदसि
नासाभङ्गोऽस्थिमज्ञस्थे नेत्ररागः स्वरद्मयः ३५
द्मते च कृमयः शुक्रे स्वदारापत्यबाधनम्
यथापूर्वं च सर्वाणि स्युर्लिङ्गान्यसृगादिषु ३६
इति कुष्ठनिदानम्
अथ श्वित्रनिदानम्
कुष्ठैकसम्भवं श्वित्रं किलासं दारुणं च तत्
निर्दिष्टमपरिस्त्रावि त्रिधातूद्भवसंश्रयम् ३७
वाताद्रूद्मारुणं पित्तात्ताम्रं कमलपत्रवत्

सदाहं रोमविध्वंसि कफाच्छ्वेतं घनं गुरु ३८
सकराडु च क्रमाद्रक्तमांसमेदःसु चादिशेत्
वर्णैनैवदृगुभयं कृच्छ्रं तच्चोत्तरोत्तरम् ३९
अशुक्लरोमाबहलमसंसृष्टं मिथो नवम्
अनग्निदग्धजं साध्यं श्वित्रं वर्ज्यमतोऽन्यथा ४०
गुह्यपाणितलौष्ठेषु जातमप्यचिरन्तनम्
स्पर्शैकाहारशय्यादिसेवनात् प्रायशो गदाः ४१
सर्वे सञ्चारिणो नेत्रत्वग्विकारा विशेषतः
इति श्वित्रनिदानम्
अथ कृमिनिदानम्
कृमयस्तु द्विधा प्रोक्ता बाह्याभ्यन्तरभेदतः ४२
बहिर्मलकफासृग्विड्जन्म मेदाच्चतुर्विधाः
नामतो विंशतिविधाः बाह्यास्तत्रामृजोद्भवाः ४३
तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः
बहुपादाश्च सूक्ष्माश्च यूका लिक्षाश्च नामतः ४४
द्विधा ते कोठपिटिकाकराडूगराडान् प्रकुर्वते
कुष्ठैकहेतवोऽन्तर्जाः श्लेष्मजास्तेषु चाधिकम् ४५
मधुरान्नगुडक्षीरदधि सक्तुनवौदनैः
शकृज्जा बहुविड्धान्यपर्णशाकोलकादिभिः ४६
कफादामाशये जाता वृद्धाः सर्पन्ति सर्वतः
पृथुब्रध्ननिभाः केचित् केचिद्गराडूपदोपमाः ४७
रूढधान्याङ्कुराकारास्तनु दीर्घास्तथाऽणवः
श्वेतास्ताम्रावभासाश्च नामतः सप्तधा तु ते ४८
अन्त्रादा उदरावेष्टा हृदयादा महाकुहाः
कुरवो दर्भकुसुमाः सुगन्धास्ते च कुर्वते ४९
हृल्लासमास्यस्रवण मविपाकमरोचकम्
मूर्च्छाच्छर्दिज्वरानाहकार्श्यक्षवथुपीनसान् ५०
रक्तवाहिसिरोत्थाना रक्तजा जन्तवोऽणवः
अपादा वृत्तताम्राश्च सौक्ष्म्यात्केचिददर्शनाः ५१
केशादा लोमविध्वंसा लोमद्वीपा उदुम्बराः

षट् ते कुष्ठैककर्माणः सहसौरसमातरः ५२
पक्वाशये पुरीषोत्था जायन्तेऽधोविसर्पिणः
वृद्धाः सन्तो भवेयुश्च ते यदाऽमाशयोन्मुखाः ५३
तदाऽस्योद्गारनिःश्वासा विड्गन्धानुविधायिनः
पृथुवृत्ततनुस्थूलाः श्यावपीतसितासिताः ५४
ते पञ्च नाम्ना कृमयः ककेरुकमकेरुकाः
सौसुरादाः सुलूनाख्या लेलिहा जनयन्ति च ५५
विड्भेदशूलविष्टम्भ कार्श्यपारुष्यपाण्डुताः
रोमहर्षाग्निसदनगुद कण्डूर्विनिर्गमात् ५६
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां
तृतीये निदानस्थाने कुष्ठश्वित्रकृमिनिदानं नाम चतुर्दशोऽध्यायः १४

पञ्चदशोऽध्यायः

अथातो वातव्याधिनिदानं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
सर्वार्थानर्थकरणे विश्वस्यास्यैककारणम्
अदुष्टदुष्टः पवनः शरीरस्य विशेषतः १
स विश्वकर्मा विश्वात्मा विश्वरूपः प्रजापतिः
स्रष्टा धाता विभुर्विष्णुः संहर्ता मृत्युरन्तकः २
तददुष्टौ प्रयत्नेन यतितव्यमतः सदा
तस्योक्तं दोषविज्ञाने कर्म प्राकृतवैकृतम् ३
समासाद्व्यासतो दोषभेदीये नाम धाम च
प्रत्येकं पञ्चधा चारो व्यापारश्च इह वैकृतम् ४
तस्योच्यते विभागेन सनिदानं सलक्षणम्
असङ्ख्यमपि सङ्ख्याय यदशीत्या पुरेरितम्
धातुक्षयकरैर्वायुः कुप्यत्यतिनिषेवितैः ५
चरन् स्रोतःसु रिक्तेषु भृशं तान्येव पूरयन्
तेभ्योऽन्यदोषपूर्णेभ्यः प्राप्य वाऽवरणं बली ६
तत्र पक्वाशये क्रुद्धः शूलानाहान्त्रकूजनम्
मलरोधाश्मवर्ध्माशीस्त्रिक पृष्ठकटीग्रहम् ७

करोत्यधरकाये च तांस्तान् कृच्छ्रानुपद्रवान्
आमाशये तृड्वमथुश्वासकासविसूचिकाः ८
कण्ठोपरोधमुद्गारान् व्याधीनूर्ध्वं च नाभितः
श्रोत्रादिष्विन्द्रियवधं त्वचि स्फुटनरूक्षते ९
रक्ते तीव्रा रुजः स्वापं तापं रागं विवर्णताम्
अरूंष्यन्नस्य विष्टम्भमरुचिं कृशतां भ्रमम् १०
मांसमेदोगतो ग्रन्थींस्तोदाढ्यान् कर्कशान् श्रमम्
गुर्वङ्गं चातिरुक्स्तब्धं मुष्टिदण्डहतोपमम् ११
अस्थिस्थः सक्थिसन्ध्यस्थिशूलं तीव्रं बलक्षयम्
मज्जस्थोऽस्थिषु सौषिर्यमस्वप्नं सन्ततां रुजम् १२
शुक्रस्य शीघ्रमुत्सर्गं सङ्गं विकृतिमेव वा
तद्वद्गर्भस्य शुक्रस्थः सिरास्वाध्मानरिक्तते १३
तत्स्थः स्नावस्थितः कुर्याद्गृध्रस्यायामकुब्जताः
वातपूर्णदृतिस्पर्शं शोफं सन्धिगतोऽनिलः १४
प्रसारणाकुञ्चनयोः प्रवृत्तिं च सवेदनाम्
सर्वाङ्गसंश्रयस्तोदभेद स्फुरणभञ्जनम् १५
स्तम्भनाक्षेपणस्वाप सन्ध्याकुञ्चनकम्पनम्
यदा तु धमनीः सर्वाः क्रुद्धोऽभ्येति मुहुर्मुहुः १६
तदाऽङ्गमाक्षिपत्येष व्याधिराक्षेपकः स्मृतः
अधः प्रतिहतो वायुर्व्रजन्नूर्ध्वं हृदाश्रिताः १७
नाडीः प्रविश्य हृदयं शिरः शङ्खौ च पीडयन्
आक्षिपेत्परितो गात्रं धनुर्वच्चास्य नामयेत् १८
कृच्छ्रादुच्छ्वसिति स्तब्धस्त्रस्तमीलितदृक्ततः
कपोत इव कूजेच्च निःसंज्ञः सोऽपतन्त्रकः १९
स एव चापतानाख्यो मुक्ते तु मरुता हृदि
अश्नुवीत मुहुः स्वास्थ्यं मुहुरस्वास्थ्यमावृते २०
गर्भपातसमुत्पन्नः शोणितातिस्रवोत्थितः
अभिघातसमुत्थश्च दुश्चिकित्स्यतमो हि सः २१
मन्ये संस्तभ्य वातोऽन्तरायच्छन् धमनीर्यदा
व्याप्नोति सकलं देहं जत्रुरायम्यते तदा २२

अन्तर्धनुरिवाङ्गं च वेगैः स्तम्भं च नेत्रयोः
करोति जृम्भां दशनं दशनानां कफोद्वमम् २३
पार्श्वयोर्वेदनां वाक्यहनुपृष्ठशिरोग्रहम्
अन्तरायाम इत्येष बाह्यायामश्च तद्विधः २४
देहस्य बहिरायामात् पृष्ठतो नीयते शिरः
उरश्चोत्क्षिप्यते तत्र कन्धरा चावमृद्यते २५
दन्तेष्वास्ये च वैवर्ण्यं प्रस्वेदः स्रस्तगात्रता
बाह्यायामं धनुष्कम्भं ब्रुवते वेगिनं च तम् २६
व्रणं मर्माश्रितं प्राप्य समीरणसमीरणात्
व्यायच्छन्ति तनुं दोषाः सर्वामापादमस्तकम् २७
तृष्यतः पाण्डुगात्रस्य व्रणायामः स वर्जितः
गते वेगे भवेत्स्वास्थ्यं सर्वेष्वाक्षेपकेषु च २८
जिह्वातिलेखनाच्छुष्क भक्षणादभिघाततः
कुपितो हनुमूलस्थः स्रंसयित्वाऽनिलो हनू २९
करोति विवृतास्यत्वमथवा संवृतास्यताम्
हनुस्रंसः स तेन स्यात्कृच्छ्राच्चर्वणभाषणम् ३०
वाग्वाहिनीसिरासंस्थो जिह्वां स्तम्भयतेऽनिलः
जिह्वास्तम्भः स तेनान्नपानवाक्येष्वनीशता ३१
शिरसा भारहरणादतिहास्यप्रभाषणात्
उत्त्रासवक्त्रक्षवथोः खरकार्मुककर्षणात् ३२
विषमादुपधानाच्च कठिनानां च चर्वणात्
वायुर्विवृद्धस्तैस्तैश्च वातलैरूर्ध्वमास्थितः ३३
बक्रीकरोति वक्त्रार्धमुक्तं हसितमीक्षितम्
ततोऽस्य कम्पते मूर्द्धा वाक्सङ्गः स्तब्धनेत्रता ३४
दन्तचालः स्वरभ्रंशः श्रुतिहानिः क्षवग्रहः
गन्धाज्ञानं स्मृतेर्मोहस्त्रासः सुप्तस्य जायते ३५
निष्ठीवः पार्श्वतो यायादेकस्याक्ष्णो निमीलनम्
जत्रोरूर्ध्वं रुजा तीव्रा शरीरार्धेऽधरेऽपि वा ३६
तमाहुरर्दितं केचिदेकायाममथापरे
रक्तमाश्रित्य पवनः कुर्यान्मूर्द्धधराः सिराः ३७

रूक्षाः सवेदनाः कृष्णाःसोऽसाध्यः स्यात्सिराग्रहः
गृहीत्वाऽधतनोर्वायुः सिराः स्नायूर्विशोष्य च ३८
पक्षमन्यन्तरं हन्ति सन्धिबन्धान् विमोक्षयन्
कृत्स्नोऽधकायस्तस्य स्यादकर्मण्यो विचेतनः ३९
एकाङ्गरोगं तं केचिदन्ये पक्षवधं विदुः
सर्वाङ्गरोगं तद्वच्च सर्वकायाश्रितेऽनिले ४०
शुद्धवातहतः पक्षः कृच्छ्रसाध्यतमो मतः
कृच्छ्रस्त्वन्येन संसृष्टो विवर्ज्यः क्षयहेतुकः ४१
आमबद्धायनः कुर्यात्संस्तभ्याङ्गं कफान्वितः
असाध्यं हतसर्वेहं दण्डवद्दण्डकं मरुत् ४२
अंसमूलस्थितो वायुः सिराः सङ्कोच्य तत्रगाः
बाहुप्रस्पन्दितहरं जनयत्यवबाहुकम् ४३
तलं प्रत्यङ्गुलीनां या कण्डरा बाहुपृष्ठतः
बाहुचेष्टापहरणी विश्वाची नाम सा स्मृता ४४
वायुः कट्यां स्थितः सक्थ्नः कण्डरामाक्षिपेद्यदा
तदा खञ्जो भवेज्जन्तुः पङ्गुः सक्थ्नोर्द्वयोरपि ४५
कम्पते गमनारम्भे खञ्जन्निव च याति यः
कलायखञ्जं तं विद्यान्मुक्तसन्धिप्रबन्धनम् ४६
शीतोष्णद्रव संशुष्कगुरुस्निग्धैर्निषेवितैः
जीर्णाजीर्णे तथाऽयाससङ्क्षोभस्वप्नजागरैः ४७
सश्लेष्ममेदःपवनमाम मत्यर्थसञ्चितम्
अभिभूयेतरं दोषमूरू चेत्प्रतिपद्यते ४८
सक्थ्यस्थीनि प्रपूर्यान्तः श्लेष्मणा स्तिमितेनतत्
तदा स्कभ्नाति तेनोरू स्तब्धौ शीतावचेतनौ ४९
परकीयाविव गुरू स्यातामतिभृशव्यथौ
ध्यानाङ्गमर्दस्तैमित्य तन्द्राच्छर्द्यरुचिज्वरैः ५०
संयुतौ पादसदन कृच्छ्रोद्धरणसुप्तिभिः
तमूरुस्तम्भमित्याहुराढ्य वातमथापरे ५१
वातशोणितजः शोफो जानुमध्ये महारुजः
ज्ञेयः क्रोष्टुकशीर्षश्च स्थूलः क्रोष्टुकशीर्षवत् ५२

रुक् पादे विषमन्यस्ते श्रमाद्वा जायते यदा
वातेन गुल्फमाश्रित्य तमाहुर्वातकराटकम् ५३
पार्ष्णिं प्रत्यङ्गुलीनां या कराडरा मारुतार्दिता
सक्थ्युत्क्षेपं निगृह्णाति गृध्रसीं तां प्रचक्षते ५४
विश्वाची गृध्रसी चोक्ता खल्ली तीव्ररुजान्विते
हृष्येते चरणौ यस्य भवेतां च प्रसुप्तवत् ५५
पादहर्षः स विज्ञेयः कफमारुतकोपजः
पादयोः कुरुते दाहं पित्तासृक्सहितोऽनिलः ५६
विशेषतश्चङ्क्रमिते पाददाहं तमादिशेत् ५६-२
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां
तृतीये निदानस्थाने वातव्याधिनिदानं नाम पञ्चदशोऽध्यायः १५

षोडशोऽध्यायः

अथातो वातशोणितनिदानं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
विदाह्यन्नं विरुद्धं च तत्तच्चासृक्प्रदूषणम्
भजतां विधिहीनं च स्वप्नजागरमैथुनम् १
प्रायेण सुकुमाराणामचङ्क्रमणशीलिनाम्
अभिधातादशुद्धेश्च नृणामसृजि दूषिते २
वातलैः शीतलैर्वायुर्वृद्धः क्रुद्धो विमार्गगः
तादृशैवासृजा रुद्धः प्राक्तदेव प्रदूषयेत् ३
आढ्यरोगं खुडं वातबलासं वातशोणितम्
तदाहुर्नामभिः तच्च पूर्वं पादौ प्रधावति ४
विशेषाद्यानयानाद्यैः प्रलम्बौ तस्य लक्षणम्
भविष्यतः कुष्ठसमं तथा सादः श्लथाङ्गता ५
जानुजङ्घोरुकटचंस हस्तपादाङ्गसन्धिषु
कराडूस्फुरणनिस्तोदभेद गौरवसुप्तताः ६
भूत्वा भूत्वा प्रणश्यन्ति मुहुराविर्भवन्ति च
पादयोर्मूलमास्थाय कदाचिद्धस्तयोरपि ७
आखोरिव विषं क्रुद्धं कृत्स्नं देहं विधावति

त्वङ्मांसाश्रयमुत्तानं तत्पूर्वं जायते ततः ८
कालान्तरेण गम्भीरं सर्वान् धातूनभिद्रवत्
कण्ड्वादिसंयुतोत्ताने त्वक्ताम्रा श्यावलोहिता ९
सायामा भृशदाहोषा गम्भीरेऽधिकपूर्वरुक्
श्वयथुर्ग्रथितः पाकी वायुः सन्ध्यस्थिमज्जसु १०
छिन्दन्निव चरत्यन्तर्वक्रीकुर्वंश्च वेगवान्
करोति खञ्जं पङ्गुं वा शरीरे सर्वतश्चरन् ११
वातेऽधिकेऽधिकं तत्र शूलस्फुरणतोदनम्
शोफस्य रौक्ष्यकृष्णत्वश्यावतावृद्धिहानयः १२
धमन्यङ्गुलिसन्धीनां सङ्कोचोऽङ्गग्रहोऽतिरुक्
शीतद्वेषानुपशयौ स्तम्भवेपथुसुप्तयः १३
रक्ते शोफोऽतिरुक्तोदस्ताम्रश्चिमिचिमायते
स्निग्धरूक्षैः शमं नैति कण्डूक्लेदसमन्वितः १४
पित्ते विदाहः सम्मोहः स्वेदो मूर्च्छा मदः सतृट्
स्पर्शाक्षमत्वं रुग्रागः शोफः पाको भृशोष्मता १५
कफे स्तैमित्यगुरुतासुप्तिस्निग्धत्वशीतताः
कण्डूर्मन्दा च रुक् द्वन्द्वसर्वलिङ्गं च सङ्करे १६
एकदोषानुगं साध्यं नवं याप्यं द्विदोषजम्
त्रिदोषजं त्यजेत्स्रावि स्तब्धमर्बुदकारि च १७
रक्तमार्गं निहत्याशु शाखासन्धिषु मारुतः
निविश्यान्योन्यमावार्य वेदनाभिर्हरत्यसून् १८
वायौ पञ्चात्मके प्राणो रौक्ष्यव्यायामलङ्घनैः
अत्याहाराभिघाताध्ववेगोदीरणधारणैः १९
कुपितश्चक्षुरादीनामुपघातं प्रवर्तयेत्
पीनसार्दिततृट्कासश्वासादींश्चामयान्बहून् २०
उदानः क्षवथूद्गारच्छर्दिनिद्राविधारणैः
गुरुभारातिरुदितहास्याद्यैर्विकृतो गदान् २१
कण्ठरोधमनोभ्रंशच्छर्द्य रोचकपीनसान्
कुर्याच्च गलगण्डादींस्तांस्तान् जत्रूर्ध्वसंश्रयान् २२
व्यानोऽतिगमनध्यानक्रीडा विषमचेष्टितैः

विरोधिरूक्षभीहर्ष विषादाद्यैश्च दूषितः २३
पुंस्त्वोत्साहबलभ्रंशशोफ चित्तोत्प्लवज्वरान्
सर्वाङ्गरोगनिस्तोद रोमहर्षाङ्गसुप्तताः २४
कुष्ठं विसर्पमन्यांश्च कुर्यात्सर्वाङ्गगान् गदान्
समानो विषमाजीर्णशीतसङ्कीर्णभोजनैः २५
करोत्यकालशयनजागराद्यैश्च दूषितः
शूलगुल्मग्रहरायादीन् पक्वामाशयजान् गदान् २६
अपानो रूक्षगुर्वन्न वेगाघातातिवाहनैः
यानयानासनस्थान चङ्क्रमैश्चातिसेवितैः २७
कुपितः कुरुते रोगान् कृच्छ्रान् पक्वाशयाश्रयान्
मूत्रशुक्रप्रदोषार्शोगुदभ्रंशादिकान् बहून् २८
सर्वं च मारुतं सामं तन्द्रास्तैमित्यगौरवैः
स्निग्धत्वारोचकालस्यशैत्य शोफाग्निहानिभिः २९
कटुरूक्षाभिलाषेण तद्विधोपशयेन च
युक्तं विद्यान्निरामं तु तन्द्रादीनां विपर्ययात् ३०
वायोरावरणं चातो बहुभेदं प्रवक्ष्यते
लिङ्गं पित्तावृत्ते दाहस्तृष्णा शूलं भ्रमस्तमः ३१
कटुकोष्णाम्ललवणैर्विदाहः शीतकामता
शैत्यगौरवशूलानि कट्वाद्युपशयोऽधिकम् ३२
लङ्घनायासरूक्षोष्णकामता च कफावृते
रक्तावृते सदाहाऽतिस्त्वङ्मांसान्तरजा भृशम् ३३
भवेच्च रागी श्वयथुर्जायन्ते मराडलानि च
मांसेन कठिनः शोफो विवर्णः पिटिकास्तथा ३४
हर्षः पिपीलिकानां च सञ्चार इव जायते
चलः स्निग्धो मृदुः शीतः शोफो गात्रेष्वरोचकः ३५
आढ्यवात इति ज्ञेयः स कृच्छ्रो मेदसाऽवृते
स्पर्शमस्थ्यावृतेऽत्युष्णं पीडनं चाभिनन्दति ३६
सूच्येव तुद्यतेऽत्यर्थमङ्गं सीदति शूल्यते
मज्जावृते विनमनं जृम्भणं परिवेष्टनम् ३७
शूलं च पीड्यमानेन पाणिभ्यां लभते सुखम्

शुक्रावृतेऽतिवेगो वा न वा निष्फलताऽपि वा ३८
भुक्ते कुक्षौ रुजा जीर्णे शाम्यत्यन्नावृतेऽनिले
मूत्राप्रवृत्तिराध्मानं बस्तेर्मूत्रावृते भवेत् ३९
विडावृते विबन्धोऽध स्वस्थाने परिकृन्तति
व्रजत्याशु जरां स्नेहो भुक्ते चानह्यते नरः ४०
शकृत्पीडितमन्नेन दुःखं शुष्कं चिरात्सृजेत्
सर्वधात्वावृते वायौ श्रोणिवङ्क्षणपृष्ठरुक् ४१
विलोमो मारुतोऽस्वस्थं हृदयं पीड्यतेऽति च
भ्रमो मूर्च्छा रुजा दाहः पित्तेन प्राण आवृते ४२
विदग्धेऽन्ने च वमनम् उदानेऽपि भ्रमादयः
दाहोऽन्तरूर्जाभ्रंशश्च दाहो व्याने च सर्वगः ४३
क्लमोऽङ्गचेष्टासङ्गश्च ससन्तापः सवेदनः
समान ऊष्मोपहतिरतिस्वेदोऽरतिः सतृट् ४४
दाहश्च स्यात् अपाने तु मले हारिद्रवर्णता
रजोतिवृत्तिस्तापश्च योनिमेहनपायुषु ४५
श्लेष्मणा त्वावृते प्राणे सादस्तन्द्राऽरुचिर्वमिः
ष्ठीवनं क्षवथूद्गारनिःश्वासोच्छ्वाससङ्ग्रहः ४६
उदाने गुरुगात्रत्वमरुचिर्वाक्स्वरग्रहः
बलवर्णप्रणाशश्च व्याने पर्वास्थिवाग्ग्रहः ४७
गुरुताऽङ्गेषु सर्वेषु स्खलितं च गतौ भृशम्
समानेऽतिहिमाङ्गत्वमस्वेदो मन्दवह्निता ४८
अपाने सकफं मूत्रशकृतः स्यात्प्रवर्तनम्
इति द्वाविंशतिविधं वायोरावरणं विदुः ४९
प्राणादयस्तथाऽन्योन्यमावृणवन्ति यथाक्रमम्
सर्वेऽपि विंशतिविधं विद्यादावरणं च तत् ५०
निःश्वासोच्छ्वाससंरोधः प्रतिश्यायः शिरोग्रहः
हृद्रोगो मुखशोषश्च प्राणेनोदान आवृते ५१
उदानेनावृते प्राणे वर्णौजोबलसङ्क्षयः
दिशाऽनया च विभजेत्सर्वमावरणं भिषक् ५२
स्थानान्यवेक्ष्य वातानां वृद्धिं हानिं च कर्मणाम्

प्राणादीनां च पञ्चानां मिश्रमावरणं मिथः ५३
पित्तादिभिर्द्वादशभिर्मिश्राणां मिश्रितैश्च तैः
मिश्रैः पित्तादिभिस्तद्वन्मिश्रणाभिरनेकधा ५४
तारतम्यविकल्पाच्च यात्यावृतिरसङ्ख्यताम्
तां लक्षयेदवहितो यथास्वं लक्षणोदयात् ५५
शनैःशनै श्चोपशयाद्गूढामपि मुहुर्मुहुः
विशेषाज्जीवितं प्राण उदानो बलमुच्यते ५६
स्यात्तयोः पीडनाद्धानिरायुषश्च बलस्य च
आवृता वायवोऽज्ञाता ज्ञाता वा वत्सरं स्थिताः ५७
प्रयत्नेनापि दुःसाध्या भवेयुर्वाऽनुपक्रमाः
विद्रधिप्लीहहृद्रोगगुल्माग्निसदनादयः ५८
भवन्त्युपद्रवास्तेषामावृतानामुपेक्षणात् ५८-२

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयंसहितायां
तृतीये निदानस्थानेवातशोणितनिदानं नाम षोडशोऽध्यायः १६
समाप्तं चेदं तृतीयं निदानस्थानम्

श्रीमद्वाग्भटविरचिते
अष्टाङ्गहृदये चिकित्सितस्थानम्
प्रथमोऽध्यायः

अथातो ज्वरचिकित्सितं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
आमाशयस्थो हत्वाऽग्निं सामो मार्गान् पिधाय यत्
विदधाति ज्वरं दोषस्तस्मात्कुर्वीत लङ्घनम् १
प्राग्रूपेषु ज्वरादौ वा बलं यत्नेन पालयन्
बलाधिष्ठानमारोग्यमारोग्यार्थः क्रियाक्रमः २
लङ्घनैः क्षपिते दोषे दीप्तेऽग्नौ लाघवे सति
स्वास्थ्यं क्षुत्तृड् रुचिः पक्तिर्बलमोजश्च जायते ३
तत्रोत्कृष्टे समुत्क्लिष्टे कफप्राये चले मले
सहृल्लासप्रसेकान्नद्वेषकास विषूचिके ४
सद्योभुक्तस्य सञ्जाते ज्वरे सामे विशेषतः
वमनं वमनार्हस्य शस्तं कुर्यात्तदन्यथा ५
श्वासातीसारसम्मोह हृद्रोगविषमज्वरान्
पिप्पलीभिर्युतान् गालान् कलिङ्गैर्मधुकेन वा ६
उष्णाम्भसा समधुना पिबेत्सलवणेन वा
पटोलनिम्बकर्कोटवेत्रपत्रोदकेन वा ७
तर्पणेन रसेनेक्षोर्मद्यैः कल्पोदितानि वा
वमनानि प्रयुञ्जीत बलकालविभागवित् ८
कृतेऽकृते वा वमने ज्वरी कुर्याद्विशोषणम्
दोषाणां समुदीर्णानां पाचनाय शमाय च ९
दोषेण भस्मनेवाग्नौ छन्नेऽन्न न विपच्यते
तस्मादादोषपचनाज्ज्वरितानुपवासयेत् १०
तृष्णगल्पाल्पमुष्णाम्बु पिबेद्वातकफज्वरे
तत्कफं विलयं नीत्वा तृष्णामाशु निवर्तयेत् ११
उदीर्य चाग्निं स्रोतांसि मृदूकृत्य विशोधयेत्
लीनपित्तानिलस्वेदशकृन्मूत्रानु लोमनम् १२
निद्राजाड्यारुचिहरं प्राणानामवलम्बनम्